॥ ओ३म् ॥
अष्टौ गुणाः पुरुषं दीपयन्ति
प्रज्ञा च कौल्यं च दमः शमश्च।
पराक्रमश्चाबहुभाषिता च
दानं यथाशक्ति कृतज्ञता च ॥
(नीतिकल्पतरु, ९ अ. ९९)

'दुर्लभा गुणा विभवाश्च।
अपेयेषु तडागेषु
बहुतरमुदकं भवति'
(-मृच्छकटिकम् २/१४)

RNI No. : DELSAN/2011/38660 ISSN 2321 - 4937 DL(E)-20/5534/2021-23

Posting Date.:
4-5, 19-20 of Every Month

सत्यनिष्ठा जयेल्लेखनी निर्भया

# संस्कृत – संवादः

पाक्षिकं समाचारपत्रम्

संपादकीयकार्यालयः ए-२/३२, वजीराबाद मार्गः, भजनपुरा, देहली-११००५३, दूरभाषः ९३११०८६७५१
ई-मेलः sanskritsamvad@gmail.com वेवसाइटः www.sanskritsamvad.com मूल्यम्-रू. १०/-

॥ ओ३म् ॥
सुशीलो भव धर्मात्मा मैत्रः
प्राणहिते रतः।
निम्नं यथापः प्रवणाः पात्रमायान्ति सम्पदः॥
(विष्णुपुराण - 1/11/24)

तद्वै राष्ट्रमा स्रवति नावं
भिन्नामिवोदकम्।
ब्रह्माणं यत्र हिंसन्ति तद्राष्ट्रं
हन्ति दुच्छुना॥
(अथर्ववेद - 5/19/8)

卐 वर्षम्-१३ 卐 अंकः-०७ (२९५) नवदेहली 卐 १ अक्टूबरमासः २०२३तः १५ अक्टूबरमासः २०२३ पर्यन्तम् 卐 विक्रमसंवत्-२०८० 卐 सृष्टिसंवत्-१,९६,०८,५३,१२३ 卐 पृष्ठम्-८

## संशोधकभवनम् एवं कुलगुरुभवनस्य उद्घाटनम्

-डॉअमितभार्गव

रामटेक। संस्कृतमातुः सेवायै शास्त्ररक्षणाय च कृतसंकल्पेन महाराष्ट्रराज्यस्य नागपुरनगरस्थितेन कविकुलगुरु-कालिदास-संस्कृत-विश्वविद्यालयेन संशोधनक्षेत्रे अग्रेसरार्थं शोधे गुणवत्तावर्धनाय, यतः छात्राः विश्वविद्यालयस्य परिसरे भूत्वा एव स्वीयं संशोधनं निर्वर्तेरन् येन च नित्यं नवोन्मेषः नवाचराः, यस्माच्च



नित्यं विश्वविद्यालयस्य ऊर्ध्वं गतिः स्यात् तन्मनसि निधाय छात्रसंशोधकभवनं निरमायि। तस्य उद्घाटनकार्यक्रमे एतस्मिन् अस्य विश्वविद्यालयस्य सम्मान्याः कुलाधिपतयः महाराष्ट्रराज्यस्य सम्मान्याः राज्यपालाः महाभागाः श्री रमेश बैसमहोदयाः आभासीयमाध्यमेन आध्यक्ष्यमावहन्। अथ च विश्वविद्यालयस्य सम्मान्याः कुलपतयः प्रो हरेरामत्रिपाठी महाभागाः याजमान्यमावहन् । संशोधकभवनस्य उद्घाटनकार्यक्रमे सम्मान्याः कुलपतयः प्रो हरेराम त्रिपाठी महाभागाः अभ्यागतान् स्वागतीकृत्य भगवत्याः सरस्वत्याः पूजां मङ्गलाचरणं च कृत्वा कार्यक्रमम् आरभन्। अस्मिन् कार्यक्रमे अधिमञ्चं मुख्यातिथित्वेन श्री लालबहादुरशास्त्री राष्ट्रियसंस्कृतविश्वविद्यालयस्य सम्मान्याः कुलपतयः श्री प्रो. मुरलीमनोहरपाठकाः मञ्चमलमकुर्वन्। विशिष्टातिथित्वेन च विश्वविद्यालयस्य संस्थापककुलगुरुः प्रो. पङ्कजचांदे महोदयः , विश्वविद्यालयस्य कुलसचिवः, परिसरसञ्चालकाः, कार्यक्रमसंयोजकाः च आसन्। संशोधकभवनस्य उद्घाटनकार्यक्रमः

शेषभागःद्वितीयेपुटे

## आचार्यकुलं संस्कृतेःसंस्काराणां च श्रेष्ठतमं शिक्षणसंस्थानम् – स्वामीरामदेवः

हरिद्वारम्। आवासीय शिक्षण संस्थानम् आचार्यकुलम्, उत्तराखंड संस्कृत अकादमी (उत्तराखंड सरकार) च इत्येताभ्याम् आयोजितासु विभिन्न संस्कृत प्रतियोगितासु विद्यालय ध्वजोत्तोलनार्थम्



अभिनन्दनं विहितम्। उल्लेखंनीयं यत् कनिष्ठ वर्गस्य गीत नृत्य प्रतियोगितायाम् आचार्यकुलम् प्रथमं अथ च आशुभाषणे श्लोकोच्चारणे च द्वितीय स्थाने अवर्तत। सममेव वरिष्ठ वर्गस्य गीत प्रतियोगितायां प्रथमं नृत्य प्रतियोगितायां तृतीय स्थानं प्राप्नोत्। विद्यार्थिनाम् उपलब्धौ पतंजलि योगपीठस्य संस्थापकः अध्यक्षः च स्वामी रामदेव महाराजः अकथयत् कथितवान् यत् आचार्यकुलस्य विद्यार्थिषु अस्मत् पूर्वजैः ऋषिभिःस्थापितानाम् अर्वाचीन संस्काराणाम। आधानं संस्कृत संस्कृति माध्यमेन कारितम्। एतैः संस्कारैः पोषितानां बालानां जीवनं पूर्णतया रूपांतरितं भवति। अस्मिन् अवसरे आचार्यकुलस्य उपाध्यक्षा आदरणीया डॉ. ऋतंभरा शास्त्री इत्यनया सहिता प्राचार्या श्रीमती आराधना कौलः विद्यार्थिभ्यः शुभाशीषं प्रदत्तवती। पावनेस्मिन्अवसरे स्वामी असंगदेवः, स्वामी अर्जुनदेवः इत्येतैः सहितः सर्वः आचार्यवृंदः, कर्मचारीगणः विद्यार्थिगणश्च उपस्थितः आसीत्।

## आर्यरत्न ठाकुरविक्रम सिंहस्य ८१ तमे जन्मदिवसे वेदनिधिस्थापनासमारोहः आयोजितः

दिल्ली। तालकटोराक्रीडाक्षेत्रे विगत दिवसः सोत्साहं समाचरितः। तत्र वेदों के संरक्षणाय वेद निधि कोष स्थापनया सह आर्य समाज गुरुकुलस्य संन्यासिभ्यः अपि सम्मानं दत्तम् स वेद विधि स्थापनाम् उद्दिश्य भारत वर्षे चलितानां गुरुकुलानाम् आर्थिक स्थितिं ध्यात्वा संस्थापितः।

विदितं च आर्य समाजय अधीन चल्यमानेभ्यः गुरुकुलेभ्यः ठाकुर बिक्रम सिंहः आर्थिक सहयोगं करोति।



तालकटोरा क्रीडाक्षेत्रे आयोजिते वेद निधि स्थापना समारोहे सहस्र संख्यायां देशस्य गुरुकुलीय बिद्यार्थिभिः सहिताः शिक्षका , अभिभावकाः सहयोगि संस्थानां प्रतिनिधयः आगताः आसन्। अवसरेस्मिन्पतंजलि बिद्यापीठ ,हरिद्वारस्य महर्षि बाबा रामदेवः अपि ऑनलाइन कार्यक्रमं संबोधितवान्।

आर्य समाजस्य देशात् समग्रात् आगतानां संगठनानां प्रतिनिधिभिः सहित संस्थानपरतया बाबा रामदेवआग्रह सर्वाणि गुरुकुलानि एकस्मिन् सूत्रे एकत्रीकर्तुं तत् प्रतिनिधित्वं कुर्युः।

बाबा रामदेवः उक्तवान् यत् वेद निधि सहयोगं कुर्वद्भिः अस्माभिः पतंजलि योगपीठकार्येषु पूर्णसहायता करिष्यते स उल्लेखनीयं यत् अस्मिन् अवसरे निधि संग्रहे 2 करोडमितराशिः संग्रहितः । ठाकुर बिक्रम सिंहः आर्य समाजस्य महत्तां प्रतिपाद्य कथितवान् यत् विश्व स्तरे भारतस्य नाम प्रकाशित भिन्न-भिन्न क्षेत्रेषु। महर्षि दयानंदम् आरभ्य हीरो कम्पनीसंचालकेन मालिक मुंजालेन सहिताः द्वादश महानुभावाः उपस्थिताः।

### उत्तराखण्ड-संस्कृत-अकादमी द्वारा संस्कृतमासमहोत्सवोपलक्ष्ये नैनीतालजनपदे "उत्तराखण्डस्य संस्कृतलेखनपरम्परा" विषये समायोजिता सङ्गोष्ठी

## "उत्तराखण्डे आप्राक्कालात् अद्यावधि संस्कृतलेखन- परम्परा" सुदृढा व्यापिका च दरीदृश्यते- पद्मश्रीः प्रोफे. अभिराज-राजेन्द्र- मिश्रः

रामनगरम्। उत्तराखण्ड-संस्कृत- अकादमी,हरिद्वार- (उत्तराखण्ड- सर्वकारः) द्वारा प्रायोजिता ष्संस्कृत-मास-महोत्सवःष इत्युपलक्ष्ये नैनीताल-जनपदे उत्तराखण्डस्य संस्कृत-लेखन-परम्परा इति विषये अन्तर्जालीया सङ्गोष्ठी समायोजिता। इयं पीएनजी राजकीय स्नातकोत्तर महाविद्यालय-रामनगरस्य संस्कृत-विभागे सम्पन्नतां याता। अत्र राष्ट्रपत्यादिपुरस्कारसभाजितः सम्पूर्णानन्द-संस्कृतविश्वविद्यालय-वाराणस्याः कुलपतिचरः




पद्मश्रीः प्रोफेसर अभिराज-राजेन्द्र-मिश्रमहोदयः मुख्यवक्तृत्वेन आसीत।साहित्याकादमीपुरस्कृतेन विश्वविश्रुतेन वक्त्रा 'उत्तराखण्डस्य संस्कृतलेखनपरम्परा' विषयेस्मिन् स्वीये वक्तव्ये प्रोक्तं यत् महर्षि-वेदव्यासविरचित-पुराणवाङ्मयात् कालिदासीय-काव्यात् अष्टम- शताब्दीतश्च साम्प्रतिककालं यावदपि समस्ते उत्तराखण्डे संस्कृतेन सर्वविधकाव्यलेखनं विधीयते। यथा- महाकाव्यादि-पद्य-कथादिगद्य-नाटकादिरूपक-चम्पू- इत्यादीनि नैकासु विधासु लेखनस्य समृद्धा प्रौढधारा च अजस्रं प्रवहन्ती दरीदृश्यते। तद्यथा- श्रीहरिः, केदारभट्टस्य-वृत्तरत्नाकरः, रुद्रदेव-ययातिचरितम्,विश्वेश्वर-पाण्डेयस्य-अलंकारकौस्तुभम् ,लोकरत्न गुमानीपन्तस्र-हितोपदेशशतकम्,प्रो.हरिनारायणदीक्षितस्य-भीष्मचरितम्, शिवप्रसाद भारद्वाजस्य-लौहपुरुषावदानम्, प्रशासनिकाधिकारी तारादत्तस्य-मानसरोवरयात्रा, श्रीकृष्ण-सेमवालः, डॉ.

शेषभागःतृतीयेपुटे

# केन्द्रीयसंस्कृतविश्वविद्यालयस्य लखनऊपरिसरे संस्कृतसंभाषणशिविरस्य सम्पूर्त्तिसमारोहः अनुष्ठितः

संवादकः-प्रवेशकुमारशुक्लः

लखनऊ। केन्द्रीयसंस्कृतविश्वविद्यालयस्य लखनऊपरिसरे शिक्षाशास्त्रविद्याशाखायां लोकभाषा- प्रचारसमितिः एवं उक्तवन्त। कार्यक्रमेऽस्मिन् शाखायाः आचार्याः प्रो० देवीप्रसाद द्विवेदीमहोदयाः, प्रो. बच्चाभारतीमहोदयाः . प्रो० गणेशशंकरविद्यार्थीमहोदयाः, डॉ. हरिओंमशर्ममहोदयाश्च उपस्थिताः आसन् ।



केन्द्रीयसंस्कृतविश्वविद्यालयस्य लखनऊपरिसरः इत्यनयोः मिलितानुतूल्येन दशदिवसात्मकसंस्कृतसंभाषणशिविरस्य सम्पूर्त्तिसमारोहः आयोजितः । शिक्षाशास्त्रविद्याशाखायाः शाखाध्यक्षायाः आचार्यायाः अवनीश अग्रवालमहोदयाया : आध्यक्षे सामारोहोऽयम् अनुष्ठितः। समारोहे अस्मिन् मुख्यातिथित्वेन लखनऊस्थ लखनऊ विश्वविद्यालयस्य सहायकाचार्याः डा० सत्यकेतुवर्याः संस्कृतसंभाषणस्योपादेयता संदर्भे स्वविचारान् समुपस्थापितवन्तः। सम्मानितातिथिरूपेण केन्द्रीयसंस्कृतविश्वविद्यालयस्य शिक्षाशास्त्रसंकायप्रमुखाः आचार्याः लोकमान्यमिश्रमहोदयाः संस्कृतसम्भाषणाय शिविरमिदं प्रेरयतीति

संस्कृतसम्भाषणशिविरस्य संचालका : विद्याशाखायाः सहायकाचार्या : डॉ० रुद्रनारायणनरसिंहमिश्रमहोदयाः शिविरस्य प्रतिवेदनं प्रस्तुतवन्तः। समारोहे अस्मिन् शिक्षाशास्त्रप्रथमवर्षीयाः द्वितीय वर्षीयाः सर्वे छात्राध्यापकाः छात्राध्यापिकाश्च प्रतिभागं कृतवन्तः। शिक्षाशास्त्रप्रथमवर्षीयः छात्राध्यापकः श्रीमान् अंकुरत्रिपाठी कार्यक्रमस्यास्य सम्पूर्णा व्यवस्थां संचालितवान्। अस्मिन् कार्यक्रमे विभिन्नतायाम् एकता,व्यवहरमाम्, कुष्माण्डभोजनालयः इत्येतानि त्रीणि नाटकानि छात्राध्यापकैः छात्राध्यापिकाभिश्च प्रदर्शितानि।

# मानवशिल्पशास्त्रमस्ति संस्कृतभाषा- प्रो0 धर्मदत्तचतुर्वेदी

डॉ० श्वेता-बरनवालः

भाषाविभाग-उत्तरप्रदेशद्वारा उत्तरप्रदेशसंस्कृतसंस्थानेन च सञ्चालितायां विंशति-दिवसीय-संस्कृतभाषाशिक्षण-कक्षायां सितम्बरमासे २०दिनाङ्के बौद्धिकसत्रमायोजितम्। कार्यक्रमस्य आरम्भे प्रशिक्षुनीलमकुमार्या वैदिकमङ्गलाचरणमाचरितम्। तदनन्तरं प्रशिक्षुअलकामहोदयया सरस्वतिवनदना, प्रशिक्षुबीनाहोदयया संस्थानगीतिका च विहिता। अतिथिपरिचयपुरस्सरं वाचिकस्वागतं संस्थानस्य प्रशिक्षिका-डॉ० श्वेता-बरनवालेन कृतम्। अनन्तरं अरुणातिवारीमहोदयः हृषिकेशझामहोदयश्च कक्षाविषयकानुभवमुक्तवन्तौ। एतस्मिन्नेव क्रमे शुभममहोदयश्चौकं गीतं गीतवान्।



संस्थानेन न केवलं प्रातिभाषिक-संस्कृत-भाषा-शिक्षणमपितु, गृहे गृहे संस्कृतम्, योग-पौरोहित्याद्यनेकयोजनाभिः संस्कृत-भाषायाः विकासः क्रियते। संस्कृतभाषा-शिक्षण-कक्षायाः एतस्मिन्

कार्यक्रमे मुख्यवक्तृरूपेण

प्रो० धर्मदत्तचतुर्वेदीमहोदयाः (शब्दविद्यासङ्कायप्रमुखः, संस्कृतविभागाध्यक्षः, केन्द्रीयोच्चतिब्बतिसंस्थानम् मानितविश्वविद्यालयः, सारनाथः, वाराणसी) समागताः आसन्।

स्वोद्बोधने महोदयैरुक्तं यत् प्रायशः प्रत्येकं राज्ये एकं संस्कृताध्ययनकेन्द्रमस्त्येव, प्रत्येकं विश्वविद्यालये महाविद्यालये च संस्कृतभाषाविभागः भवत्येव तथापि

अस्माकं सर्वेषा हृदये कण्ठे च संस्कृतभाषा नास्ति। नेहरुमहोदयेन भारतस्य काव्यद्वयमेव स्वीकृतमासीत् रामायणं महाभारतञ्च। तथा च महाभारते लिखितं वर्तते यत्-"धर्मे च अर्थे च कामे च मोक्षे च भरतर्षभ। यदिहास्ति तदन्यत्र यन्नेहास्ति न तत्क्वचित् ।।"

किन्तु किमस्ति एतस्मिन् ग्रन्थे वयं तावदवगन्तुं न शक्नुमः यावद् संस्कृतभाषामेव न जानीमः। यथा बाणभट्टकविना संस्कृतकविकालिदासस्य विषये उक्तम्-

निर्गतासु न वा कस्य कालिदासस्य सूक्तिषु । प्रीतिर्मधुरसान्द्रासु मञ्जरीष्विव जायते।। अतः अस्माभिर्वेदानां, पुराणानां, रामायणस्य, महाभारतस्य, स्मृतिग्रन्थानां, संस्कृतसाहित्यानाञ्च अध्ययनमवश्यमेव करणीयम्।

साम्प्रतकाले चारित्रिकह्रासं दृष्ट्वा एतदेव वक्तुं शक्नुमः यत्-

एतद्देशप्रसूतस्य सकाशादग्रजन्मनः ।
स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः।।

अर्थात् ये सम्यक् पठित्वा उच्चशिक्षां च प्राप्य सम्यक् न आचरन्ति, ते निश्चयेन संस्कृतज्ञास्तु न भवन्ति। यतो हि मानवशिल्पशास्त्रमस्ति संस्कृतभाषा। यथा च चिकित्साशास्त्राणि प्रयोगे आधारितानि सन्ति तथैव संस्कृतभाषाऽपि वर्तते। पठनादनन्तरं प्रयोगः आवश्यकः भवति। संस्कृतव्याकरणं संस्कृतकवीन् च पठित्वा तस्य प्रयोगः अस्माकं हृदयेन कण्ठेन च अवश्यमेव करणीयः। महाभाष्येऽपि लिखितं वर्तते यत्- 'प्रयोगे सर्वलोकस्य' अतः अस्माभिः न केवलं कक्षायां अपितु गृहे, ग्रामे, नगरे, जनपदे, राज्ये, राज्यसभायां, लोकसभायां, संसदि सर्वत्र एतस्याः भाषायाः प्रयोगे न लज्जा करणीया। एकस्मिन् दिवसे भारतसर्वकारस्य निद्राभङ्गः भविष्यति। सर्वेषां हृदयेन कण्ठेन च इयं भाषा संयुक्ता भविष्यत्येव। किन्तूत्तरप्रदेशसंस्कृतसंस्थानेन सञ्चाल्यमाना इयं कक्षा श्लाघ्नीयैव।

कार्यक्रमेऽस्मिन् उत्तरप्रदेशसंस्कृतसंस्थानस्य प्रमुखः सचिवः जितेंद्रकुमारः, निदेशकः विनयश्रीवास्तवः, प्रशासनिकाधिकारी- डॉ० जगदानन्दझावर्यः, सर्वेक्षिका डॉ० चन्द्रकलाशाक्या, प्रशिक्षणप्रमुखः सुधिष्ठकुमारमिश्रः, प्रशिक्षणसमन्वयकः धीरजमैथानी दिव्यरंजनः राधा शर्मा च उपस्थिता आसन्। कार्यक्रमस्य सञ्चालनं प्रशिक्षाकसचिनशर्मामहोदयेन, धन्यवादज्ञापनं प्रशिक्षकगणेशदत्तद्विवेदीमहोदयेन च कृतम्। सत्रस्य समापनं शान्तिमन्त्रेण अभवत्। कार्यक्रमेऽस्मिन् संस्थानस्य सर्वे प्रशिक्षकाः सर्वे प्रशिक्षवश्चोपस्थिताः आसन्। न केवलं अध्येतारः, बालकाः, पुरुषाः एतस्यां कक्षायां पठितुं शक्नुवन्ति, अपितु गृहिण्यः दिव्यचक्षवः अपि कक्षां कर्तुं शक्नुवन्ति। तर्हि शीघ्रं कुर्वन्तु- पञ्जीकरणाय- https://sanskritsambhashan.com/

# उत्तराखण्डविद्वत्सभा सदैव नूतनां दिशं प्रदाय समाजम् उपकरोति - आचार्यः सुभाषजोशी

-धीरज मैठाणी

देहरादूनम्। भारतीय ब्रह्मण महासंघ द्वारा आयोजितायां भगवतःपरशुरामस्य पञ्च दिवसीय चरित्र कथायाम् उतराखंड विद्वत् सभाया पदाधिकारिषु अध्यक्षः आचार्यःविजेन्द्रममगांई, उपाध्यक्षः आचार्यः सत्यप्रसादसेमवालः महासचिवः आचार्यःदिनेशभट्टः आचार्यवाचस्पतिडिमरी , कोषाध्यक्षः आचार्यः अजयडबरालः परामर्शकः




आचार्यः राजेशअमोली आचार्यः आदित्यरामथपलियालः, आचार्यः राजेश्वरसेमवालः, आचार्यः धीरजमैठाणी , आचार्यः दीपकअमोली इत्येते विद्वांसः उपस्थिताः । सुप्रसिद्ध कथावाचकस्य आचार्य सुभाष जोशिमहाभागस्य श्री मुखाद्भगवतः परशुरामस्य बाललीला, चूडाकर्म, यज्ञोपवीतसंस्कारः इत्येषां मार्मिक कथानकं श्रुतम्। आयोजकेन भारतीय ब्रह्मण महासंघ देहरादूनेन सभायाः स्वागतं विहितम् । आचार्येण सुभाष जोशिना उतराखण्ड विद्वत् सभायै अपेक्षायां सत्यां सहयोगं दातुम् आश्वसितम्। तेनोक्तं यत् उत्तराखण्डविद्वत्सभा सदैव नूतनां दिशं प्रदाय समाजम् उपकरोति। सभायाः परतया अध्यक्षेण श्रीमता विजेन्द्र ममगाईमहादयेन आभारः प्रकटितः।

प्रथमपुटस्य शेषभागः

## संशोधकभवनम् एवं...

विश्वविद्यालयपरिसरस्थजातवेदसीयज्ञशालायां विष्णुयागेन अरब्धः तत्र सर्वेपि अथितियः विष्णुयागे पुर्णाहुतिं प्रादुः। एतत्कार्यक्रमाङ्गत्वेन च साहित्यविभागद्वारा एकदिवसीयराष्ट्रियचर्चासत्रमपि समायोजि। कार्यक्रमेस्मिन् विश्वविद्यालयस्य सम्मान्याः कुलपतयः प्रो हरेरामत्रिपाठी महाभागाः स्वकार्यकालीनपाञ्चवार्षकीं कार्ययोजनां न्यरूपयन्। तत्र च विशेषेण यथायं कविकुलगुरु-कालिदास-संस्कृत-विश्वविद्यालयः नैक् द्वारा ((NACC A++) प्राप्नुयात् तद्दिशि विश्वविद्यालयपरिवारः परिश्रमं करिष्यति। अथ च भारतीयज्ञानपरम्परामाश्रित्य यथा वैश्विकस्तरे विश्वविद्यालयस्य प्रतिष्ठा स्यात् किञ्च च भारतीयज्ञानपरम्परामाश्रित्य आधुनिकज्ञानयुक्ता आर्षपरम्परा च संशोधनमाध्यमेन यथा रक्षिता स्यात् तदर्थं नूनं विश्वविद्यालयः बद्धकटिः भविष्यति। सर्वेपि पाठ्यक्रमाः भारतीयज्ञानपरम्पराधारिताः भविष्यन्ति येन च नवशिक्षानीत्या यत् चिकीर्षितम् अस्ति तत् सेत्स्यति इति। किञ्च अस्य विश्वविद्यालयस्य यः अन्यः वारङ्गापरिसरः वर्तते तस्य अन्ताराष्ट्रियस्वरपेण वर्धनं संस्कृतविश्वविद्यालयस्य छात्राणां समीपे नयनाय परभणीनगरे परिसरान्तरस्य समाजे व्यवस्थापनम् इत्यादि सम्मान्याः कुलपतयः स्वीयां पाञ्चवार्षिकीं योजनां राज्यपालानां समीपे उपस्तापयामासुः। ततः परं मुख्यातथीनां भाषणोत्तरम् अस्य विश्वविद्यालयस्य सम्मान्याः कुलाधिपतयः महाराष्ट्रराज्यस्य सम्मान्याः राज्यपालाः महाभागाः श्री रमेश बैसमहोदयाः आभासीयमाध्यमेन अध्यक्षीयभाषणम् अकार्षुः। तत्र ते अवदन् यत् भारतस्य प्राचीनतामां देवभाषां रक्षितुं संस्कृतविश्वविद्यालयानाम् अस्ति नितराम् अपेक्षा। यदि संशोधकभवनस्य उद्घाटनं भविष्यति तर्हि अवश्यम् अन्यभ्यः अपि राज्येभ्यः अपि छात्राः आगत्य त्रैव स्थित्वा संशोधनं कर्तुं शक्नुयुः। किञ्च एकदिवसीय-पाठ्यसमालोचनात्मकचिन्तनरूपायाः संगोष्ठ्याः उद्घाटनं निमत्तीकृत्य अपि स्वीयं मार्गदर्शनम् अकार्षुः। कार्यक्रमश्च राज्यपालमहाभागानां श्री रमेश बैसमहोदयानाम् उद्बधनानन्तरं राष्ट्रगानेन समाप्तिम् अगात्।

# प्रतीकात्मकनाट्यपरम्परायाः सिद्धान्तः प्रयोगश्च

– डॉ. मणिशंकरद्विवेदी, नवदेहली

देहल्यां स्थितेन भारत-संस्कृत-समवायेन सितम्बरमासस्य त्रयोविंशतितमे दिनांके सायंकाले 'प्रतीकात्मकनाट्यपरम्परायाः सिद्धान्तः प्रयोगश्च' इति विषयमधिकृत्य एकं विशिष्टं व्याख्यानमायोजितम्। कार्यक्रमेऽस्मिन् मध्यप्रदेशस्य अमरकण्टके स्थितस्य इन्दिरागाँधिजनजातीय-विश्वविद्यालस्य संस्कृतविभागस्य सहायकाचार्यो डॉ.सचिनदेवद्विवेदी विद्वान् वक्ता आसीत्। स महता परिश्रमेण प्रतीकनाटकस्य सामग्रीं संकलय्य व्याख्यानं कृतवान्। स अवोचद् यत् प्रतीकनाटकस्य बीजं वैदिकसाहित्ये पुराणसाहित्ये च




समुपलभ्यते। परन्तु एकादशशताब्द्यां श्रीकृष्णमिश्रस्य प्रबोधचन्द्रोदयनाटकः प्रतीकनाटके आद्यस्थानं भजते। तत्र अद्वैतसिद्धान्तस्य प्रदर्शनं सञ्जातम्। तत्र विवेकः प्रधाननायकः मोहश्च प्रतिनायकः अस्ति। आनन्दरायमखीमहोदयस्य विद्यापरिणयं नाटकम् अद्भुतम् अस्ति। स्वकीये व्याख्याने विदुषा वक्त्रा अनेकानि अन्यानि प्रतिकात्मकनाटकानि अपि विवेचितानि।

कार्यक्रमस्य विशिष्टातिथिः दिल्लीस्थितस्य जामिया-मिल्लिया-इस्लामिया-विश्वविद्यालयस्य संस्कृतविभागाध्यक्षः प्रो. गिरीशचन्द्रपन्तमहोदयः स्वकीये व्याख्याने प्रतिपादितवान् यत् नाट्यशास्त्रे प्रतीकनाटकस्य अत्यधिकं महत्त्वं विद्यते। तत्र दर्शनशास्त्रस्य निगूढसिद्धान्तः सरलशब्देन सामाजिकानां कृते समुपलभ्यते। स कथितवान् यत् दिल्लीविश्वविद्यालये क्षेमेश्वरस्य चण्डकौशिकनामकं प्रतीकनाटकं स्वीकृत्य तेन शोध कार्यं कारितवान् । बहूनि प्रतीकनाटकानि देशे समुपलभ्यते परन्तु समग्रतया प्रतीकनाटकस्य विश्लेषणं न सञ्जातम्।

कर्णपुरनगरस्थितेन श्रीविक्रमाजीतसिंहसनातनधर्ममहाविद्यालयस्य संस्कृतविभागस्य आचार्या प्रो. शोभा मिश्रमहोदया कार्यक्रमस्य अध्यक्षा आसीत् । साकथितवती यत् अस्माकं भारतदेशे प्रतीकनाटकस्य बृहती परम्परा आसीत्। महाकवेः कालिदासस्य नाटकेऽपि प्रतीकनाटकस्य स्पष्टं संकेतम् अस्माभिः पठ्यते। सा कथितवती यत् 'ग्रीवाभङ्गाभिरामम्' इति कालिदासीये सुललिते पद्ये वर्णनम् अस्ति यत् हरिणः राजानं दुष्यन्तं तीव्रवेगेन नीत्वा आश्रमं आनयति। अत्र हरिणः महर्षिकण्वस्य प्रतीकः अस्ति। महर्षिकण्व एव हरिणरूपेण राजानं स्वकीये आश्रमे आगमनाय प्रेरयति। तया भणितं यत् प्रो. रामजीउपाध्यायस्य खण्डद्वयात्मके दीर्घकाये नाट्येतिहासग्रन्थे ६०० प्रतीकनाटकानां बृहती सूची अस्माभिः अवलोक्यते ।

भारतसंस्कृतसमवायस्य समन्वयकः प्रो. सन्तोषकुमारशुक्लवर्यः समागतानां सर्वेषां विदुषां श्रोतृवृन्दानां स्वागतं कुर्वन् अवोचद् यत् जगत् द्विधा अस्ति। आन्तरिकं जगत् बाह्यं जगत् चेति। बाह्यं जगत् सर्वजनग्राह्यम्, आन्तरिकं जगत् चक्षुषा नैव गृह्यते तर्हि कथं प्रतीकात्मकं मनः, विवेकः, विद्या, मोहः इति आन्तरिकवस्तुं व्यक्तरूपेण विषयं प्रस्तौति । अयं विषयः सर्वथा नवीनः अस्ति।

कार्यक्रमेऽस्मिन् देशस्य विविधेभ्यः प्रान्तेभ्यः स्थितेभ्यः विश्वविद्यालयेभ्यः महाविद्यालयेभ्यः उत अन्येभ्यः शैक्षणिकसंस्थानेभ्यश्च अनेके विद्वांसः, शोधच्छात्राश्च सोत्साहं भागं गृहीतवन्तः।

प्रथमपुटस्य शेषभागः

## "उत्तराखण्डे आप्राक्कालात् अद्यावधि संस्कृतलेखन-...

निरञ्जन मिश्रस्य-गङ्गापुत्रावदानम्,डॉ. कीर्ति वल्लभ शक्टा-राष्ट्रं भवति सर्वस्वम् ,डॉ.कमला पाण्डेया,प्रो. रामविनय सिंहस्य-शाश्वती, स्वामी चिदानन्द सरस्वती मुनेः -हिन्दूविश्वकोषः इत्यादिषु कवि-काव्यादिषु ज्ञानवर्धकं समाजोपकारकञ्च व्याख्यानं प्रस्तुतम्। केन्द्रीय- संस्कृतविश्वविद्यालय-देवप्रयाग परिसरस्थ-उत्तराखण्डस्य निदेशकः मुख्यातिथिश्च प्रोफेसर पी.वी.बी. सुब्रह्मण्यम् महोदयः स्वोद्बोधने उत्तराखण्डस्य ज्योतिषीणां संस्कृत-प्रचारकानां देवप्रयागस्थमहाविद्यालयस्य स्थापने कृतभूरिपरिश्रमाणां च मुकुन्दः, मुरलीधरः, बालकृष्णभट्टः, कैलाश चन्द्र जोशी इत्यादीनां नामानि पुरस्करोति।देहलीस्थ-श्रीलालबहादुर-शास्त्री-केन्द्रीय-संस्कृत-विद्यापीठस्य शोधविभागाध्यक्षेण विशिष्टातिथिना च प्रोफेसर शिवशङ्करमिश्रेण निगद्यते यत् उत्तराखण्डे स्थितानाम् आश्रमाणां संस्कृत-विद्यालय-महाविद्यालयानां च संस्कृतलेखनक्षेत्रे महत्त्वपूर्णमवदानं वरीवर्ति।हल्द्वानीस्थ-एम.बी.पी.जी. महाविद्यालयस्य संस्कृतविभागाध्यक्षा सारस्वतातिथिः च प्रोफे. कमला पन्तमहोदया अवोचत् यत् शैलेश तिवारी, जगन्नाथ जोशी, युवराज भट्टराई आदि-कविमूर्धन्याः उत्तराखण्डस्य संस्कृतलेखनसाधनां संवर्धयन्ति।रामनगरस्थ-पीएनजी राजकीय-स्नातकोत्तर-महाविद्यालयस्य प्राचार्यः कार्यक्रमाध्यक्षश्च प्रोफेसर मोहन चन्द्र पाण्डे वर्तते।अयं शुभकामनापुरस्सरं श्रीकृष्ण जोशी आदीनां संस्कृतसंवर्धने नामोल्लेखं विदधाति। अनेनोच्यते यत् एतादृशैः विविधकार्यक्रमैः संस्कृतस्य समाजे प्रचार-प्रसाराय संरक्षणाय च अवसरो लभ्यते। उत्तराखण्डसंस्कृत-अकादमी-हरिद्वारस्य शोधाधिकारिणा राज्यसंयोजकेन च डॉ. हरीशचन्द्र गुरुरानी इत्यनेन निगद्यते यत् संस्कृतस्य सर्वतोभावेन प्रचारार्थं प्रसारार्थं च अकादमीपक्षतः काले-काले बहुविधाः कार्यक्रमाः सञ्चाल्यन्ते आयोज्यन्ते च।रामनगरस्थ-पीएनजी राजकीय-स्नातकोत्तर-महाविद्यालयस्य संस्कृतविभागाध्यक्षाः, मञ्चसञ्चालकः नैनीतालजनपदसंयोजकश्च डॉ. मूलचन्द्र शुक्लो विद्यते।अनेन कार्यक्रमस्य परिचयात्मकं प्रास्ताविकं पुरस्कृतम्। सहसंयोजकः डॉ. चन्द्र प्रकाश उप्रेती महोदयः अतिथिभिः सह समेषां कार्तज्ञ्यं विज्ञापितवान् । सङ्गोष्ठ्यामस्यां रामनगरमहाविद्यालयेन सह देशस्य प्रत्येकं क्षेत्रेभ्यः विद्वान्सः, संस्कृतानुरागिणः छात्र-छात्राश्च उपस्थिता आसन्। अत्र आहत्य 70-80 उपस्थितिः दृग्गोचरीभवतिस्म।

### पाठकानां कृते सूचना

**कृपया 'संस्कृत-संवादः' पाक्षिकवार्तापत्रस्य ग्राहकत्वं स्वीकर्तुम् आजीवनं सदस्यताशुल्कः- रु. २५००/-, पञ्चवार्षिकशुल्कः रु. ११००/- (संस्थादीनां कृते) द्विवार्षिकशुल्कः रु.४८०/- (व्यक्तीनां कृते) मनिऑर्डरः , चैकः, ड्राफ्टः, इत्यनेन 'संस्कृत-संवाद' इतिनाम्नः सम्पादकीयकार्यालये प्रेषयेयुः। अथवा अस्यां वित्तकोषसंख्यायां (A/C) शुल्कराशिः प्रेषयितुं शक्यते। वित्तकोषविवरणम्**

**Sanskrit samvad,**

**Current A/C No. 22490200000142,**
**Indian Overseas Bank, Yamuna Vihar,**
**Delhi-110053**
**IFC Code- IOBA0002249**

# पं. मोतीलालशास्त्रिस्मारकं व्याख्यानम्

-डॉ. लक्ष्मीकान्तविमलः, नव देहली

नवदेहल्यां श्रीशंकरशिक्षायतनवैदिकशोधसंस्थानेन सितम्बरमासस्य २८तमे दिनांके अपराह्णे श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविश्वविद्यालयस्य वाचस्पतिसभागारे पण्डित मोतीलालशास्त्रिस्मारकं व्याख्यानम् समायोजितम्। प्रख्याताः वैदिकविद्वांसः आचार्याः ज्वलन्तकुमारशास्त्रिवर्याः 'पण्डितमधुसूदनओझामहोदयानां वैदिकचिन्तने योगदानम्' इति विषयमधिकृत्य व्याख्याख्यानं कृतवन्तः। स्वकीये व्याख्याने ज्वलन्तकुमारवर्याः पण्डितमधुसूदनओझामहोदायानां जीवनपरिचयक्रमे वैदिकविज्ञानपरम्परायाः महनीयानाम् आचार्याणां महामहोपाध्यायगिरिधरशर्मचतुर्वेदिवर्याणां, पण्डितमोतीलालशास्त्रिवर्याणां, प्रख्यातानां इतिहासविदां डॉ. वासुदेवशरणाग्रवालमहोदयानाम्उल्लेखंकृतवन्तः। एते सर्वे पं.ओझामहोदयानां शिष्याःआसन्। ज्वलन्तकुमारवर्याः कथितवन्तः यत् युधिष्ठिरमीमांसकमहोदयाः स्वकीयायाम् आत्मकथायां पं.ओझामहोदयानाम् उल्लेखं कृतवन्तः। युधिष्ठिरमीमांसकमहोदयाः पं.ओझामहोदयेभ्यः शिक्षाम् अवाप्तवन्तः। वेदाः चत्वारः सन्ति इति सामान्यजनाः जानन्ति। परन्तु शास्त्रप्रमाणेन पं. ओझामहोदयाः वेदत्रय्याः विवेचनम् अकुर्वन्। ऋग्वेदः पद्यात्मकः, सामवेदः गेयात्मकः यजुर्वेदे गद्यपद्ययोः समावेशः अस्ति। अनया दृष्ट्या वेदत्रयी विद्यते। तैत्तिरीयब्राह्मणस्य वचनम् उद्धृत्य वेदत्रय्याः संकल्पना विद्यते । सृष्टौ या मूर्तिः अस्ति सा ऋक्, सृष्टौ या क्रिया अस्ति स यजुर्वेदः, सृष्टौ पदार्थे यत् तेजः विद्यते तत् तेजः एव सामवेदः। यथोक्तम्-

**'ऋग्भ्यो जातां सर्वशो मूर्त्तिमाहुः, सर्वा गतिर्याजुषी हैव शश्वत्।**



**सर्वं तेजं सामरूप्यं ह शश्वत, सर्वं हेदं ब्रह्मणा हैव सृष्टम्।।'(तैत्तिरीयब्राह्मणम् ३.१२.८.१)**

कार्यक्रमस्यास्य मुख्यातिथयःश्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविश्वविद्यालयस्य माननीयाः कुलपतयः प्रो. मुरलीमनोहरपाठकमहोदयाः स्वकीये उद्बोधने कथितवन्तः यत् ते स्वछात्रजीवनकाले पं.ओझाजीमहोदयानां दशवादरहस्य ग्रन्थस्य अध्ययनं कृतवन्तः। ऋग्वेदस्य नासदीयसूक्तम् अधिकृत्य दशवादसंबन्धिन्या अवधारणया पं. ओझामहोदयाः विशालं वाङ्मयं विरच्यवैदिकविज्ञाने महदुपकारं चक्रुः। अनेन क्रमे सदसद्वादः, अहोरात्रवादः, आवरणवादः, व्योमवादः, रजोवादः प्रकाशितो जातः । ओझामहोदयाः शास्त्रलेखने तल्लीनाः असन्। तेषां प्रभूतायां यात्रायां रुचिं नासन्। यतो हि २८८ ग्रन्थाः ते प्रणीतवन्तः। ते न केवलं प्रभूतायाः यात्रायाः भीतिं प्राप्नुवन्ति अपितु सम्प्रदायदृष्ट्या वैदिकविज्ञानस्य चिन्तनं न कृतवन्तः। ते वेदे ब्राह्मणग्रन्थे पुराणे च सृष्टिविज्ञानस्य यां दृष्टिं प्राप्तवन्तः तां दृष्टिम् अस्माभिः समक्षं प्रस्तुतवन्तः। जामिया मिलिया इस्लामिया विश्वविद्यालयस्य संस्कृतविभागाध्यक्षाः प्रो. गिरीश चन्द्रपन्तमहाशयाः कार्यक्रमे विशिष्टातिथयः आसन्। ते अपरवादग्रन्थस्य विवेचितस्यविषयस्य उद्घाटनं कुर्वन्तः पं. मधुसूदनओझामहोदयानां विदेशयात्रायाः वैदेशिकेन विदुषा सह रोचकस्य वार्तालापस्य चर्चां कृतवन्तः।अध्यक्षीये उद्बोधनेउत्तराखण्डसंस्कृतविश्वविद्यालयस्य पूर्वकुलपतयः प्रो. देवीप्रसादत्रिपाठिवर्याः कथितवन्तः यत् पं.ओझामहोदयानां दृष्टिं सर्वथा सुलभा तत्त्वावबोध नपरा अस्ति। त्रिपाठिवर्याः अकथयन् यत् त्रिलोक्याः कीदृशी अभिनवा व्याख्या तैः विहिता। त्रिलोकीमध्ये भूः, भुवः स्वः, महः जनः तपः सत्यम् एता व्याहृतयः सन्ति। भूशब्देन पृथ्वी, स्वःशब्देन सूर्यः, मध्ये भुवः अन्तरिक्षस्थानीयः, इयं प्रथमा त्रिलोकी। स्वःशब्देन पृथ्वी, महःशब्देन अन्तरिक्षः जनशब्देन परमेष्ठी गृह्यते, इयं द्वितीया त्रिलोकी। जनशब्देन पृथ्वी, तपःशब्देन अन्तरिक्षः सत्यपदेन स्वयम्भू-प्रजापतिः गृह्यते, इयं तृतीया त्रिलोकी। एताः तिस्रः त्रिलोक्यः शास्त्रपरम्परायां रोदसीशब्देन, क्रन्दसीशब्देन एवं च संयतीशब्देन संगृह्यते। जवाहरलालनेहरूविश्वविद्यालयस्य संस्कृत-प्राच्यविद्याध्ययनसंस्थानस्य आचार्याः उत श्रीशंकरशिक्षायतनवैदिकशोध संस्थानस्य समन्वयकाः प्रो. सन्तोषकुमारशुक्लवर्याः विषयप्रवर्तनक्रमे अवोचन् यत् श्रीशंकरशिक्षायतनं प्रतिवर्षं सितम्बरमासस्य २८ तमे दिनांके निरन्तं स्मारकं व्याख्यानं समायोजयति। शिक्षायतनं संगोष्ठीमाध्यमेन वैदिकपरिचर्चामाध्यमेन कार्यशालामाध्यमेन वैदिकविज्ञानक्षेत्रे सततं शैक्षिकं कार्यं करोति। पं.ओझामहोदयानां ग्रन्थः विश्वविद्यालयस्य पाठ्यक्रमे न समाहितत्वात् प्रचारात् प्रसारात् उपेक्षितो जातः, इति धिया श्रीऋषिकुमारमिश्रः स्वकीयस्य गुरोः पण्डितमोतीलालशास्त्रिणः निर्देशं हृदये निधाय वैदिकविज्ञानप्रचाराय प्रसाराय च श्रीशंकरशिक्षायतनवैदिकशोधसंस्थानस्य संस्थापनां कृतवान्। प्रो. शुक्लवर्याः समागतानाम् अतिथीनां श्रोतृवृन्दानां स्वागतवचनं धन्यवादवचनं च ज्ञापितवन्तः। कार्यक्रमस्य शुभारम्भः श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविश्वविद्यालयस्य आचार्याः प्रो. सुन्दरनारायणझामहोदयाः वैदिकं मंगलाचरणम् एवं च प्रो.महानन्दझावर्याः लौकिकं मङ्गलाचरणं कृतवन्तः। कार्यक्रमस्य सञ्चालनं श्रीशंकरशिक्षायतनस्य शोधाधिकारी डॉ. मणिशंकरद्विवेदी कृतवान्। वैदिकशान्तिपाठेन कार्यक्रमोऽयं संपन्नः सञ्जातः।

कार्यक्रमस्य प्रारम्भे श्रीशंकरशिक्षायतनेन प्रकाशितस्य "वैदिक सृष्टि प्रकिया" इति नामकस्य नवीनस्य ग्रन्थस्य लोकार्पणः समागतानाम् अतिथिवर्याणां करकमलयोःसञ्जातः। अयं ग्रन्थः वैदिकविज्ञानस्य अनेकस्य पक्षस्य उद्घाटनं करोति।

अस्मिन् कार्यक्रमे दिल्लीविश्वविद्यालयस्य एवं तत्सम्बद्धस्य महाविद्यालयस्य, जामिया-मिलिया-इस्लामिया-विश्वविद्यालयस्य, श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृत-विश्वविद्यालयस्य, जवाहरलालनेहरूविश्वविद्यालयस्य अनेके आचार्याः, शोधच्छात्राः वैदिकविज्ञाने रुचिमन्तः विद्वांसः स्वकीयं सहभागित्वं कुर्वन्तः कार्यक्रमस्यसाफल्ये महद्योगदानम् अकुर्वन्।



चतुर्थपुटस्य शेषभागः

# “वेदेषु यज्ञविज्ञानम्”

वा४१२६) पाषाण-व 1- बहुल - गिरीणी ग्रहणम्, अक्रियत + शक्य व्यवहणे (शत ब ३।३।४।७) द्य सुश्रुत संहितायां (चिकित्सा अध्यायः वट) सोमेपलब्धिः हिमालये, अर्बुदाच ले, साह्यो, महेन्द्रगिरौ, मलयाचले, श्री, देवगिरी, देवसह, पारियात्रे, विन्ध्ये, देवसुन्के हदे, वितस्तायाः उत्तरेण प्रवृद्धेषु महीधरेषु,हि उल्लिखितम् निधिटा अस्ति । जत्र एवं अग्रे एवे “पञ्च तेचो अध्ये सिन्धुनामा महानदः । हमवत् प्लवते तंत्र चन्द्रमा सोमाखत्तमः। तस्यो ईशधु चाप्यस्ति मुण्डावानंशुमानपि। काश्मीरेषु सरो दिव्यं नाम्ना क्षुद्रमनसम् गायत्र स्त्रष्टुभः पाक जागतः शाक्वरस्य। अत्र सत्यपरे चापि सोमाः सोमसमप्रभाः” इयं सोमलता शर्यणावत-प्रकृति-स्थानेषु उपलभ्यते (ऋ० से. हा ६५% २२२३)। भूजवति पर्वते अपि सोम- स्थितिः अधिगम्यते (०सं० २०/३४द्य१]। एवं प्रतीयते यह जल प्राचुर्य देशेषु पर्वतेषु च सामः मिसति स्म । इमे सोम पर्वतेषु स्थान प्राजादयः गन्धर्वाः रक्षन्ति रम है ( तै० सं० छा ।१०)। एवम् अर्थ सोमः इन्द्र-देवासुर- गन्धर्व-मनुष्याणां सर्वेबार एवं प्रियतमः पदार्थःअष्टदं जानीमः। सोमलता स्वरूपर अवप्रकारों सुश्रुत से हिलाया। चिकित्सा स्थान रह जाये अध्या में सोमलतायाः स्वरूपम् एवं हि निर्दिष्टम्- श्यामलाला च निष्पन्ना श्रीरिव त्वचि मांसल / श्लेष्मला वजनी वल्ली सोमपारख्या द्वारा भोजनम् सोमवल्ल) महागुल्म यज्ञभेला चलता। सोमा र्हा गुल्मचल्ली च यज्ञपल्ली द्विजप्रिया। सोमवल्ली कटुः शीता मधुख पित्तदाह कृत् कृष्णा विशोष रामजी पावजी यशसाधनी । सर्वेषामेव सोमानं पत्राणि दश पञ्चदश चा तानि शुक्ले च कृष्णच जायन्ते नियताली चा एकैकं जायते पत्र सोमस्याहरह स्तदा क्लस्य पञ्चदश्यां तु भवेत् पञ्चदशच्छूद ऋक्सः हितायं तु सम्पूर्णम् एव एकं सूक्तंसोम-गुण-वर्णनं मिलति (ऋवसंहिता 4/48/1-15) ।

कृष्णयजुर्वेदस्य अध्ययनन इंदमू अपि विज्ञायत सोमस्य कश्चन अंशुः क्षीणा अपि भवति स्म (जै० सं० १/२/११ तथा सायण-भाष्यम् सुश्रुत- चरकाचार्यो लिखता यत् सोमस्य पञ्चदश पत्राणि भवन्ति - येषु पूर्णिनोत्तरं प्रतिदिनं क्रमशः एकैक पत्र क्षिणोति (सुश्रुत संहिता अध्यायः वर्ए, चरक- संहिता अध्याय : १) ।।

**सोम-स्थिति-निर्देशः**

अयं सोमः कद्र-सुपणरिव्यानानुसारं पूर्वं द्युलोके स्थितः आसीत् , गायत्री च ततः तं पृथ्व्याम् अर्थ सोमः कद्रू-सुपर्णारि व्यानानुसारं पूर्व घु-लोक स्थितः आसीत, गायत्री च नतः आनीतवती ( तै० ख ६१६) अन्न अस्य स्थितिः पर्वतेषु निद्दिश्यते (शत०० (३/३(४१७)/ वरुणः अद्रौ सोमं वितनुते (जै० से. १)। सायणः पाषाण- सन्धिषु सोमोत्पत्ति स्वीकुरुते। “अद्रि”- शब्देन निष्पद्यते । पाषाण-बहुल - गिरीणी ग्रहणम्, अक्रियत + शतपथ ब्राह्मणे सुश्रुत संहितायां (चिकित्सा अध्यायः) सोमेपलब्धिः हिमालये, अर्बुदाच ले, सह्याद्री, महेन्द्रगिरौ, मलयाचले, श्री, देवगिरी, देवसरे, पारियात्रे, विजये, देवसुन्के हरे, वितस्तायाः उत्तरेण प्रवृद्धेषु महीधरेषु निर्दिष्टस्थ । तत्र एवं अग्रे एवं हि उल्लिखितम्-

“पञ्च तेचो मध्ये सिन्धुनामा महानदः ।
हमवत्प्लवते तत्र चन्द्रमाः सोमखत्तमः ।।
तस्यो ईरेयु चाप्यस्ति मुण्डावानंशुमानपि ।
काश्मीरेषु सरो दिव्यं नाना मानसम् ।।
गायत्रस्त्रष्टुभः प्राजागतः शाक्वरस्तथा ।
अत्र सत्यपरे चापि सोमाः सोमसमप्रभाः।।”

इयं सोमलता शर्यवत -प्रकृति-स्थानेषु उपलभ्यते (ऋ० से हाइ/२२२३ )। भूजवति पर्वते अपि सोम- स्थितिः अधिगम्यते ( पृ० १०।३४।१।। एर्व प्रतीयते यत् जल प्राचुर्य- देशेषु पर्वतेषुच सोमः मिलत स्म । इमे सोमं पर्वतेषु स्वान प्राजादयः गन्धर्वाः रक्षन्ति। ( तै० ० ६ 3170)। एवम् अर्थ सोमः इन्द्र-देवासुर- गन्धर्व-मनुष्याणं सर्वेखार एवं प्रियतमः पदार्थः अवतिष्ट जागी५० ।

**सोमलता-स्वरूपम्-**

अवप्रकारों सुश्रुत से हिलाया चिकित्सास्थाने रह जाये अध्याये सोमलतायाः स्वरूपम्, एवं हि निर्दिष्टम्-

‘यामलाम्बा च निष्पन्ना श्रीरिणी विचि मांसल।
‘लेष्मला वमनी वल्ली सोमारख्या द्वागभोजनार।।

सोमवल्ल) महागुल्म यज्ञाचनुल सोमाह गुल्मवल्ली च यज्ञपल्ली द्विजप्रिया ।

सोमवल्ली कटुः शीता मधुर पित्तदाहकृत् कृष्णा विशोष रामजी पावनी यशसा धनी ।

सर्वेयामेव सोमान पत्राणि दश पञ्चदशाचा
तानि शुक्ले च कृष्णच जायन्ते नियतानि
चा एकैकं जायते पत्र सोमस्याहरहस्तदा ।
उक्लस्य पञ्चदश्य भवे पञ्चदशद ।
शौर्य से पत्र मे के के दिवसे दिवसे पुनः ।
कृष्णपक्ष क्षमे चापि लता भवति केवल)

**सोम-पान प्रभावः -**

तत्र एवन्त-संहितायां चिकित्सास्थाने गई तो अध्याये सोमवान प्रभाव निम्नति-पद्येषु वर्णितः -

ष्सोषधीनां पतिं सोममुपयुज्य विचक्षणः ।
दश वर्ष सहस्राणि नवाँ चारयते तनुम् ।।
नाग्निर्न तोयं न विषं न शस्त्रं नानुमेव च।
तस्यालमायुक्षपणे समर्थाच्च भवन्ति हि ।
भद्राणां षष्टिवर्षाणां प्रसूताना
अनेकथा कुञ्जराणां सहस्रस्य बलं समधिगच्छति ।।
श्रीरं शक्रसदनमुत्तर्रश्च कुरूनपि यचेच्छति स गर्नु वा प्रतिहता गतिः।।
साणे पाडुरच निखिलान् वेदान विन्दति ।
चरत्यमोघएका ल्पो देववच्चारिवलं जगत्।।
कन्दर्प इव रूपेण कान्त्या चन्द्र इवापरः ।
प्रह्लाद शते भूतानां मनसि स महायुतिः।।”

# “अस्मद्राष्टे ज्ञानाधारेण व्यक्तेः सम्मानं क्रियते न तु जातेः - प्रो.मिथिलाप्रसादत्रिपाठी”

भोपाल। केंद्रीय संस्कृत विश्वविद्यालय, भोपाल परिसरस्य संस्कृत भारत्याश्च संयुक्त तत्वाधाने “संस्कृत परंपराणां संवर्धने अनुसूचित जाति एवं अनुसूचित जनजाति योगदान” विषये



आयोजिते द्विदिवसीये राष्ट्रीय संगोष्ठ्याः 29 एवम 30 सितंबर 2023, तमे दिनांके उद्घाटन सत्रे मुख्यातिथि रूपेण प्रो. मिथिला प्रसाद त्रिपाठी,पूर्व कुलपतिः महर्षि पाणिनि संस्कृत एवं वैदिक विश्वविद्यालय उज्जैनं, सारस्वत अतिथि रूपेण प्रो. मुरली मनोहर पाठकः, कुलपतिः श्री लाल बहादुर शास्त्री राष्ट्रीय संस्कृत विश्वविद्यालय नई दिल्ली, सम्मानित अतिथिः प्रो.सुद्युम्नाचार्यः, अध्यक्षः वेदवाणीवितानम, सतना, विशिष्ट अतिथिः प्रो.हरिराम रैदासः, पूर्व विभागाध्यक्षः शासकीय हमीदिया कला एवं च वाणिज्य महाविद्यालयः, भोपालम्, अध्यक्ष रूपेण केंद्रीय संस्कृत विश्वविद्यालयः, नई दिल्ली कुलपतिः प्रो. श्रीनिवास वरखेड़ी च उपस्थिताः । सर्वप्रथमं माता सरस्वती प्रतिमायाः समक्षं दीप प्रज्ज्वलनं कृत्वा कार्यक्रमः शुभारब्धः ततः परिसर निदेशकः प्रो. रमाकांत पाण्डेयः, प्रस्तावित भाषणमकरोत् , संगोष्ठी समन्वयक प्रो.नीलाभ तिवारी, स्वागत भाषणं प्रस्तुतवान् , संगोष्ठी सचिवः प्रो.अशोक कुमार कछवाहः एवं च संस्कृत भारत्याः अखिल भारतीय प्रचार प्रमुखः, श्री श्रीसराव भेडसगावकरः समागतानाम् अतिथीनाम् आतिथ्यं कृतवान।परिसरस्य निदेशकः प्रो रामाकांत पाण्डेयः प्रस्तावित भाषणे शबरी वाल्मीकिम् आरभ्य भगवद्रामकृष्णयोः समयम् आरभ्य च वर्तमान समयं यावत् संस्कृत विदुषाम् उल्लेखं कृतवान् ये अनुसूचित जाति जनजाति इत्याभिः सम्बद्धाः सन्ति, तथा राष्ट्रीय एकतायै वर्गस्यास्य विद्वद्भिः संबद्धाः शोधाः अपेक्षिताः। स्वीये उद्बोधने मुख्य अतिथिः प्रो. मिथिला प्रसाद त्रिपाठी कथितवान् यत् अस्मद्राष्टे ज्ञानाधारेण व्यक्तेः सम्मानं क्रियते न तु जातेः । विशिष्ट अतिथि प्रो. मुरली मनोहर पाठकः, कुलपतिः श्री लाल बहादुर शास्त्री राष्ट्रीय संस्कृत विश्वविद्यालय नई दिल्ली, अकथयत् यत् अनुसूचित जातेः अनुसूचित जनजातेः च एका सुदृढ परम्परा अस्मद्देशे विद्यते। परन्तु मध्यकाले तेषु एकं भयमासीत्। साम्प्रतं देशे तेषां योगदानाय संस्कृत क्षेत्रे अनुसंधानम् आवश्यकम् । हमीदिया महाविद्यालयस्य पूर्व विभागाध्यक्षः प्रो.हरिराम रैदासः विभिन्न वैदिक मंत्राणां पुराणानां च उदाहरणं दत्तम्। प्रो.सुद्युम्नाचार्यः, अध्यक्ष वेदवाणीवितानम, सतना, अकथयत् यत् जाति शब्दस्य न जन शब्दः प्रयोगः जातः वर्तते। अध्यक्षीय उद्बोधने कुलपतिः प्रो.श्रीनिवास वरखेडी देशे



संस्कृत परंपरासु अनुसूचित जाति एवं च अनुसूचित जनजाति योगदान विषये भोपाले आयोजिते देशस्य महत्त्वपूर्ण सम्मेलने येन समाजे एतत् योगदानस्य परिचयः स्यात् देशस्य समरसतायै शोधः स्यात् एतदर्थम् आयोजकेभ्यः वर्धापनानि। कार्यक्रमे देशस्य अनुसूचित जातेः एवं च अनुसूचित जनजातेः 65 तः अधिकाः संस्कृत विद्वांसः



स्व शोध पत्राणि प्रस्तुतवन्तः । कार्यक्रम संचालनं श्री आयुष दीक्षितः एवं च आभारं संस्कृत भारत्याः श्री श्रीशराव भेड़सगावकरः ज्ञापितवान् ।

# ग्रन्थस्य लोकार्पणम्

वाराणस्याम् अगस्तमासे डॉ. शिल्पासिंहायाः डॉ. राजेशसरकारस्य च युगपत्प्रयत्नेन “विदेशी विद्वानों का वेद एवं संस्कृत विद्या विषयक अवदान” इति नाम ग्रन्थस्य लोकार्पणम् अनन्त-



श्रीविभूषितश्रीमत्काञ्चीपीठाधीश्वरैः परमाचार्यैः स्वामिश्रीविजयेन्द्रसरस्वतीमहाभागनां राष्ट्रीयस्वयंसेवकसंघस्य सरकार्यवाहश्रीयुतानाञ्च मोहनभागवतानां करकमलैः श्रीचेतसिंहदुर्गान्तःपाति आयोजितचातुर्मास्यमहोत्सवे पूर्तिमगात् । सद्यो मुक्तिविधायिन्यां काश्यां चातुर्मास्यमहोत्सव : बहुदिनेभ्यः आयोज्यमानः अस्ति । ग्रन्थमिदं नवदेहलीस्थ चौखम्बा-ओरियेण्टलिया- प्रकाशकेन हि प्रकाशितमस्ति । ग्रन्थेऽस्मिन् वेदस्य संस्कृतविद्यायाश्च क्षेत्रे अध्ययनाध्यापनाऽनुसन्धानरतानाम् योरोप-रूस, पृथक-सोवियतगणराज्यदेशेषु लैटिन-अमरीकदेशेषु च कृतभूरिश्रमाणां चतुश्चत्वारिंशदधिकशतविदुषां यथायथम् इतिवृत्तं कर्तृत्वञ्च सविस्तरेण कालक्रमेण च उपन्यस्तम् अस्ति।एतद तिरिक्तं प्रायेशः शतत्रयविदुषां विषये संक्षिप्तसूचनासारिण्या सूचितमस्त ग्रन्थस्य परिशिष्टभागे श्रीमतां प्रोफैसर-श्रीकिशोरमिश्रमहाभागानां ( काशीहिन्दूविश्वविद्यालयस्यसंकाय-प्रमुखाणाम् ) पाश्चात्यवेदविदाम्परम्पराविमर्शः इति नामा ग्रन्थः सानुवादः समादृतः सम्मिलितश्चाऽस्ति। अद्यतनस्य कार्यक्रमान्तर्गते अनन्तश्रीविभूषिताः परमाचार्याः, सरसंघकार्यवाहश्रीमोहनभागवतमहाभागाः, राजस्थानस्थ जगद्गुरुरामानन्दाचार्य- संस्कृतविश्वविद्यालयस्य पूर्वकुलपतिचराः प्रो. युगलकिशोरमिश्रवर्याः, प्रो.श्रीकिशोरमिश्रवर्याः, प्रो. चन्द्रकान्तारायवर्याः, काशीहिन्दूविश्वविद्यालयस्य लब्धप्रतिष्ठशिक्षकाः, वाराणसीस्थाः विद्वच्चरणाः अन्ये च सम्मानिताः जनाः समुपस्थिता आसन्।

## पुत्रीस्नेहस्तु सर्वेभ्यस्नेहेभ्यश्च प्रशस्यते



प्रो. बनमाली बिश्वाल:

अनुपमोपहारश्च पुत्री देवस्य मन्यते।
आनन्दवर्धनात् पित्रो: नन्दिन्यपि निगद्यते।।
कन्यानाम्ना प्रसिद्धा सा कमनीयोस्ति सर्वदा।
कुलद्वयहिताय सा दुहिता कथ्यते बुधै:।।
पित्रोर्जाता च पुत्रीयमात्मजोन्वर्थनामिनी।
पितरावात्मजानां वै रक्षायै च समर्पितौ।।
तनुजेयं तनोर्जाता तनयोपि निगद्यते।
अंगजा कथ्यते पुत्री सुता नाम्ना प्रसिद्ध्यति।।
प्रकाशस्य स्वरूपाश्च पुत्र्य: पित्रो: कृते सदा।
प्रकाशयन्ति गृहाणि ग्रामेषु नगरेषु वा।।
पाटलानि च पुष्पाणि शोभन्ते वाटिकासु वै।
पुत्र्य: पुष्पस्वरूपास्ता: गृहशोभाकरास्सदा।।
पुत्र्यो या वाल्यकाले तु स्वप्नान् पश्यन्ति सार्थकान्।
पूरयितुं च तानेव यतन्तेपि दृढेच्छया।।
पितरि हृदयं पुत्र्या: निवसतीति मान्यता।
पितुश्च हृदयं पुत्र्यां वसति नात्र संशय:।।
पतिगृहं यदा पुत्री विवाहान्ते च गच्छति।
पित्रो: कृते प्रसंगोयं नितरामस्ति दु:खुद:।।
पीड्यन्तेनेन दु:खेन कण्वादयस्तपस्विन:।
का कथा वा गृहस्थानां प्रसंगेस्मिन् विचिन्त्यताम्।।
यस्यां कस्यां च संज्ञायां पुत्री तु पितृवत्सला।
राष्ट्रियं दिनमेकं च नित्यं पुत्रीदिनं गृहे।।
सर्वा: पुत्र्योभिनन्द्यन्ते पुत्रीदिने च राष्ट्रिये।
पुत्रीस्नेहस्तु सर्वेभ्यस्स्नेहेभ्यश्च प्रशस्यते।।

## विद्या वाग्देवता लोके विद्यालयोपि मन्दिरम्

प्रायशो गम्यते यत्र क्रियते देवदर्शनम्।
विद्या वाग्देवता लोके विद्यालयोपि मन्दिरम्।।
विद्याया मन्दिरं श्रेष्ठं सर्वेषु मन्दिरेषु वै।
हैद्राबादे मया कृतं विद्यामन्दिर-दर्शनम्।।
उस्मानियेति नाम्नोस्ति विश्वविद्यालयस्तु य:।
तत्राम्बेडकराख्यश्च ग्रन्थालय: प्रसिद्ध्यति।।
छात्रैश्च परिपूर्णोस्ति तत्रत्यो वाचनालय:।
संस्कृत-पुस्तकानां च कृतं मयोवलोकनम्।।
कलाशाखा च तत्रत्या प्राचीने भवने स्थिता।
सामाजिकं च विज्ञानं तद्भवने च पाठ्यते।।
भवनं प्रस्तरैश्चैव निर्मितमस्ति सर्वथा।
विश्वविद्यालये चातो दर्शनीयं हि मन्यते।।
संस्कृतपरिषत्तत्र प्रसिद्ध्यति पुरातनी।
प्रकाशनेन शोधस्य महत्त्वं यत्र वर्तते।।
मल्लीनाथस्य जन्मात्र जातमित्येव मन्यते।
ग्रामे कोलाचले ख्याते हैद्राबाद-समीपके।।
प्रसिद्धानां च काव्यानां टीका: कृताश्च मानका:।
लिख्यते यत्र नामूलं कथ्यतेपेक्षितं सदा।।

## सर्वार्थसाधकं देवं नौमि तां गणदेवताम्

वन्दे गणपतिं देवं वन्दे श्रीगणनायकम्।
वन्दे सिद्धिप्रदं देवं वन्दे विघ्न-विनाशकम्।१।
वन्दे बुद्धीश्वरं देवं नौमि तां बुद्धिदेवताम्।
ऋद्धि-सिद्धिधवं वन्दे नौमि तं शिवनन्दनम्।२।
पार्वत्याश्चात्मजं वन्दे लम्बोदरं विनायकम्।
तम्मोदकप्रियं नौमि वन्दे तामादिदेवताम्।३।
दातारं सर्वसिद्धीनामैश्वर्यपरिपोषकम्।
साधकं सर्वकार्याणां नौमि तं शत्रुबाधकम्।४।
आदिपूजां विना यस्य सर्वार्चनं हि निष्फलम्।
सर्वार्थसाधकं देवं नौमि तां गणदेवताम्।५।
नमस्तस्मै गणेशाय गणाधिपतये नम:।
गजास्याय नमस्तस्मै गं गणपतये नम:।६।
वन्दे तमेकदन्तं च नौमि मूषकवाहनम्।
वन्दे तं सूपकर्णं च वन्दे संकटहारकम्।७।
सूक्ष्मबुद्ध्या युतं देवं स्थूलतनुं नमाम्यहम्।
वक्रतुण्डं देवं वन्दे नौमि तं वामनाकृतिम्।८।
जम्बुफलप्रियं वन्दे कपित्थफलसेवितम्।
नौमि कमलहस्तं च दुर्वादलसुशोभितम्।९।
पाशांकुशैर्युतं देवं शंखचक्रादिभूषितम्।
वेष्टितं शेषनागेन यज्ञोपवीतधारिणम्।१०।
मोहासुरस्य हन्तारं ज्ञानारिणो विनाशकम्।
संहारकं च दुर्बुद्धे: वन्दे सिन्दुरदारकम्।११।
तं लेखनकलायां च पटुं वन्दे गणेश्वरम्।
गणानां गणनाथन्तं नमामि गणभास्करम्।१२।
आराष्ट्रं गणेशस्यैव समर्चनं महीयते।
तत्र किन्तु विशिष्यैव पूर्वक्षेत्रे च दक्षिणे।१३।
गणेशस्य महाराष्ट्रे दशदिनेषु पूजनम्।
ततश्च दशदिनान्ते क्रियते वै विसर्जनम्।१४।
विसर्जने गणेशस्य जप्यते यच्च कर्णयो:।
फलीभवति तच्छर्वं जीवने चेति मान्यता।१५।

## केशवो रामशेष:



प्रणेता©

प्रो. ताराशंकरशर्मा पाण्डेय:

नानाशास्त्राभिदृष्टे रसभुवि कविताकान्तरूपानुसृष्टे:
काव्यालापा: प्रकाशा: सुललितपदका: शब्दमूर्तेर्हि विष्णो:।
आस्वाद्यन्ते च विज्ञै: कविवररचिता नैकरासप्रपूरा:
लोकैर्वावन्द्यतेऽसौ सहृदयरसिकैर्ब्रह्मसाराभिपूर: ।। 1 ।।

सृष्टेरादौ नटेशस्त्रिभुवनभवनो भावभूमीसुगम्यो
गीर्वाणेभ्योऽर्धनारीश्वरपदप्रथितं नृत्यलास्यं चकांक्ष ।
नाट्यं तच्चित्तचारु व्यतनुत भरतो मोदसिद्ध्यै समन्ताद्
वावन्द्यो नोऽस्ति लोके भरतमुनिरसौ नाट्यशास्त्रावतारी ।। 2 ।।

व्याख्यातं सिद्धशास्त्रैर्भरतमुनिकृतं भव्यसूत्रं रसस्य
प्रोत्पत्तिं लोल्लटोऽसावनुमितिमवदच्छंकुकोऽयं द्वितीय: ।
शास्त्रान्वेष्टा तृतीयो बहुविधविभिदं नायको भुक्तिवादं
योऽभिव्यक्तिं व्यतानीद् रुचिरमभिनवो गुप्तपाद: स तुर्य: ।। 3 ।।

संबुद्ध्य ग्रन्थरत्नं भरतमुनिकृतं मूसलग्रामसंज्ञै-
राचार्यैर्नाट्यवेदाधिकृतसुधिषणै: केशवाद्याभिरामै: ।
पद्मश्रीकै: पुरस्तात् सहृदयविदुषां द्वादशोल्लासपूर्ण:
प्रत्यग्र: स्थाप्यतेऽयं जगति विसृमरो नाट्यशास्त्रेतिहास: ।। 4 ।।

ग्रन्थादौ नाट्यशास्त्रोद्गमयुतरचनाकाल - निर्धारणादि:
पश्चान्निर्माणशिक्षाऽभिनयगृहभिदा वर्णिता नाट्यसिद्ध्यै ।
नृत्तादीनां प्रभेदा: समुचितपदका लास्यलालित्यलासा:
तुर्योल्लासे च प्रोक्ता बहुविधगणिता नाट्यभावा विशेषा: ।। 5 ।।

साङ्गोपाङ्गो रसानां विविधमतनिधिस्तात्त्विकोल्लासभूमौ
पात्रालंकारवेशोऽभिनयविविधता नाट्यवेदानुकूला ।
काव्योत्कर्षापकर्षप्रविधिपरिचयो लक्षणं काव्यभूत्यै
पञ्चावस्थाद्यसन्धि-प्रकृतिप्रवचना लक्षिता वस्तुभेदा: ।। 6 ।।

लक्ष्यन्ते नैकभेदा: सचिवप्रकृतयो नायिकानायकाद्या:
कैशिक्यादिप्रवृत्तिं निदिशति दशमे नाटकादे: स्वरूपम् ।
नेपथ्योक्तिश्च वाद्योपकरणकथनं पूर्वरङ्गश्च नान्दी
पूर्ण: सङ्गीतशास्त्रोद्भव-मुनिनिनदो नाट्यशास्त्रेतिहास: ।। 7 ।।

राष्ट्राध्यक्षात्तमानोऽपिच भरतमुनीत्याख्यसम्मानवेत्ता
पद्मश्रीकालिदासाद्यबहुविधपुरस्कारभूषो विपश्चित् ।
काव्ये नाट्ये नदीष्णो रचयति बहुशो मूसलग्रामसंज्ञो
नानाकार्य: प्रशस्यो बुधवरप्रथम: केशवो रामशेष: ।। 8 ।।

इति जयपुरवास्तव्येन राष्ट्रपतिसम्मानित-प्रतिनवबाणभट्ट-पण्डित-श्रीमोहनलालशर्मपाण्डेयात्मजेन श्रीकल्लाजीवैदिक-विश्वविद्यालय-कुलपतिना प्रोफेसर(डॉ.) ताराशंकरशर्मपाण्डेयेन प्रणीतं "केशवो रामशेष:" नाम 'पद्मश्रीकेशवराममूसलगांवकरप्रशस्तिकाव्याष्टकं' सम्पूर्णम्।

---

## कुरुते पुरुषं बहुलं मधुरम्



डॉ. जोगेन्द्रकुमार:
एसोसिएट प्रोफेसर
बी.एल.जे.एस.
महाविद्यालय:
तोशाम:(भिवानी)

वसनं रुचिरं वचनं मधुरं
त्वरितं शयनं खलु जागरणम्।
अशनं सरलं मननं सरलं
कुरुते पुरुषं बहुलं मधुरम्।।

वचनं सुदृढं वरणं मधुरं
भजनं गिरिशं पठनं ह्यनिशम्।
भ्रमणं सततं गमनं सरलं
कुरुते पुरुषं बहुलं मधुरम्।।

प्रकृतिर्मधुरा च कृतिर्मधुरा
विशदा हि मतिश्च रतिर्विशदा।
समता हि सुखे व्यसने समता
कुरुते पुरुषं बहुलं मधुरम्।।

त्यजनं ह्यहितं ग्रहणञ्च हितं
हसितं मधुरं नयनं मधुरम्।
चरितं विमलं हृदयं विमलं
कुरुते पुरुषं बहुलं मधुरम्।।

वपनञ्च तरोरवनं पयस:
व्यथनं न जनं दमनं मनस:।
शपनं विमलं भरणं विमलं
कुरुते पुरुषं बहुलं मधुरम्।।

## सूर्यपञ्चाशिका



-डॉ. अरविन्दकुमारतिवारी

हत्वा पितुर्मम रवे! युगनेत्रशक्तिं
वृद्धस्य विंशतिचतुष्टयवत्सरस्य।
दु:खं ददासि बहु यत् तदहं वदामि
श्रुत्वा दयस्व कुरु नो विपदि प्रमादम्।। १।।
संश्रावयामि जनकस्य निजस्य पीडां
हे भास्कर! द्रुतमहो! भगवन्! दयालो!
शून्यं जगद् विहितवान् कथमस्य हत्वा
वार्द्धक्य एव गतिमन्नयनप्रकाशम्।। २।।
जानासि किन्न गृहिणां विविधास्तु लीला:
ब्रूते स्नुषा न मधुरं श्वशुरं कदापि।
वृद्धं विलोकयति नैव बुभुक्षितं यं
तं त्वं निपीडयसि भास्कर! तातपादम्? ३।।
किन्ते पितुर्दिवसकर्तरये कदाचिद्
भूयाद्दशा भुवनभास्कर! नेत्रनाशात्।
त्वं चिन्तयिष्यसि यथा विकलत्वमेत्य
तद्वद्विचिन्त्य विकलत्वमहं न दूये? ४
हे सूर्य! संस्मर निजे नयने विशाले
याभ्यां विलोकयसि खे विचरन्निन्द्र:।
ज्योतिर्भवेदसमये यदि यात्रिणस्ते
शून्यं तदा न भविता सवित:! कुयात्रा?५
ज्ञात्वा सहस्रकिरण! ध्रुव वृत्तमेतत्
त्वं प्राणिनो हरसि नेत्रविभां कथं भो;!
देवो+सि शक्तिभरितो न भयं कुतश्चित्
लोके बली न कुरुते किमये प्रमत्त:। ६
प्रात:क्रियामयमये जनको मदीयो
गच्छन् यदा वदति मां विकलं वचस्तत्।
श्रुत्वा शिलातलमलं द्रवतीव भानो!
किन्तु त्वमेव द्रवसीह न मित्र! जाने।। ७
प्रक्ष्यामि सूनुरधुना निशि सेवमानस्
तं सूर्यदेव! पितरं विकलं शयानम्।
ब्रूयात् कदाचिदयि मूत्रयितुं तदा को
मूत्रालयं तमचिरं वद नेष्यतीह।। ८
भुङ्क्ते न भोजनमहो भयभीतचेता:
दूनो मनागपि पिता बहुबोधितोऽपि।
दोषो मदीय इति ते न वदामि सूर्य!
किन्तु त्वमेव नयनस्य मतोऽसि देव:।। ९
स्थाल्यां न पश्यति रवे! जनकस्तु सूपं
रोटीं च शाकमहहा न जलं दधीति।
हस्तेन संस्पृशति मे पितरीह चोष्णं
किं ज्वालयत्यचिरमेव करं न शाकम्।। १०
स्नातुं जलं करयुगेन पिता मदीयो
लब्धुं यदा प्रयतते तदहं विभाव्य।
सीदामि हा नयनयो: सलिलं विमुञ्चन्
ज्योतिर्हृतं तव रवे! कुकृतं न कस्मात्।। ११
आजीवनं तव कुलस्य रवे! सदोत्थो
गायन् सदा रघुपतेश्चरितं प्रभाते।
सम्प्राप्तवान् रविगृहात् किमु सम्प्रसादं
येनाक्षियुग्मकिरणान् हृतवान् पितुर्मे।। १२
पादारविन्दुयुगलं तव संस्पृशामि
दृष्टिं निवर्तय पुनर्जनकस्य मे त्वम्।
येनास्य जीवनमये सुखदु:खराशिं
पश्यत् प्रयातु परलोकसुमार्गगामि।। १३
शौचक्रियापि कठिनानुदिनं तु भानो!
सञ्जायते किमु मुहु: प्रवदामि पुत्र:।
मित्र! त्वमेव भव मित्रवरो मदीयो
दद्या: पितुर्मम रवे! नयनप्रकाशम्।। १४
वैरं कुरुष्व कविना सह नैव सूर्य!
लोके+रविन्दतनयेन मया श्रुतेन।
मित्र! ब्रवीमि विनयेन ददस्व दृष्टिं
स्तोष्यामि नो रघुकुलस्य पित:! पितुर्मे। १५
अभ्यर्थना निशि कृता करुणामयीत्थं
मन्ये श्रुता भगवता भवता मदीया।
संशायित: कविरहं विलिखंस्तु पद्यं
सुप्तोत्थित: पुनरहं रचयामि कल्ये।। १६।।
सम्बन्ध एष युगतो दिशि वर्तते नौ
भानो! प्रभो! विधिकृतो भुवि भावनीय:।
प्राच्यां यदा समुदयं लभसे तदैव
हासोऽरविन्दकुसुमस्य विलोक्यते मे।। १७

शेष अग्रिमअंङ्के

# संजय-शिक्षक-प्रशिक्षण-महाविद्यालये लालकोठीजयपुरे पूर्वछात्रसम्मेलनकार्यक्रमे सांस्कृतिकप्रस्तुतयः

-डॉ० सुनीताभार्गवः

संजय-शिक्षक-प्रशिक्षण-महाविद्यालये लालकोठीजयपुरे पूर्वविद्यार्थिनां समायोजनकार्यक्रमस्य सुचारुसमाप्त्यर्थं शिक्षाशास्त्री इत्यस्य छात्रैः मातु सरस्वत्याः आह्वानं कृतम्। डॉ. अंजना अग्रवाल इत्यनेन



पूर्वविद्यार्थी सदस्यानां संक्षेपेण परिचयः कृतः तथा च मञ्चस्य संचालनं प्रशिक्षु महेन्द्रसिंहेन कृतम्। महाविद्यालय प्राचार्य डॉ. सुनीता भार्गव, डॉ. यशवंती गौर एवं कर्मचारिसदस्यैः पूर्वछात्राणां स्वागतमकरोत्। स्वागतं च कृत्वा तस्य माला कृत्वा दैनिकं दत्त्वा पारितोषितम्। अस्मिन् अवसरे पूर्वविद्यार्थिनः सदस्याः महाविद्यालयसम्बद्धाः स्वस्मृतयः विनिमयं कृतवन्तः। तेषां सफलतायां महाविद्यालयस्य महत् योगदानं कृतम् इति उक्तं तथा च प्रशिक्षुणः स्वलक्ष्यं चयनं कर्तुं अनुशासनेन नियमितरूपेण अध्ययनं कर्तुं च प्रेरिताः।कार्यक्रमस्य प्रथमश्रृङ्खलायां पूर्वविद्यार्थीनां सदस्यानां स्वागतार्थं सांस्कृतिककार्यक्रमस्य आयोजनं कृतम् । कार्यक्रमस्य उद्घाटनम् ख. एड. गणेश वंदना द्वितीयवर्ष छात्रासोनमद्वारा कारितम्। पुनः नृत्यं 'आओ नी पधारों महरो देश', एकलनृत्यं राजस्थानीनृत्यम्, दम्पतीनृत्यं, समूहनृत्यम् आदि प्रस्तुतयः अभवन्। अवसरेऽस्मिन् पूर्वछात्रा प्रियांशीपारीकद्वारा मनमोहक एकलनृत्यं श्लुक छुप न जावो जीश प्रस्तुतमभवत्। प्रेक्षकशालायां गरजन्ततालीवादनेन सह प्रेक्षकाणां पादौ अपि नृत्यार्थं टङ्कणं कर्तुं आरब्धवन्तः ।

कार्यक्रमस्य अन्ते पूर्वविद्यार्थी सचिवा अभिमुखीकरणकार्यक्रमप्रभारी डॉ. रीता झाझरिया इत्यनेन ६ दिवसीयस्य कार्यक्रमस्य प्रतिवेदनं प्रस्तुतम्। डॉ.मौसम पारीकः सभागारे उपस्थितानां महाविद्यालयपरिवारस्य सर्वेषां सदस्यानां कृते हृदयेन अभिनन्दनं धन्यवादं च दत्तवान् ये अस्मिन् कार्यक्रमे प्रत्यक्षं परोक्षं च समर्थनं दत्तवन्तः तेभ्यो धन्यवादाभियक्तीकृतम्।

# द्वादशदिवसात्मकः संस्कृतसम्भाषणवर्गः प्रारब्धः

-नूतनविष्णुरेग्मीः

'सम्पन्नः द्वादशदिवसात्मकः संस्कृतसम्भाषणवर्गः' श्रीदीवान-कृष्ण-किशोर-सनातनधर्म-आदर्श-संस्कृत-माहविद्यालयः, अम्बाला छावनी इत्यत्र सितम्बरमासस्य 11 दिनाङ्कात् 22 दीपककुमारपाण्डेयमहोदयेन स्वानुभवकथने उक्तं यत् अत्रत्याः छात्राः बुद्धिमन्तः/बुद्धिमत्यः च सन्ति । सश्रद्धं कक्षाम् आगत्य अल्पे समये अधिकं पठितवन्तः/पठितवत्यश्च । अन्ते च तेन प्राचार्याणां कृते संयोजकयोः कृते च धन्यवादाः समर्पिताः ।



सितम्बरपर्यन्तं प्राचलत् । कार्यक्रमस्य आरम्भं दीपप्रज्वालनेन प्राचार्याः, प्राध्यापकाश्च अकार्षुः । वैदिकमङ्गलाचरणं शुभमः अकरोत् । लौकिकमङ्गलाचरणं शास्त्रीप्रथमवर्षस्य छात्रः प्रस्तुतवान्। ततः वर्गप्रशिक्षकस्य श्रीमान् दीपककुमारपाण्डेयमहोदयस्य प्राचार्यमहाभागैः स्मृतचिह्नादिभिः सम्माननम् अभिनन्दनं च व्यधायि । मञ्चे विराजमानानां प्राचार्याणां डॉ. विष्णुदत्तमहाभागानां तथा अन्येषामाचार्याणामपि माल्यार्पणेन स्वागतम् अभवत् । ततः छात्राः (श्रुतिः, अङ्किता, मोहिनी) सामूहिकं गीतम् अगायन् । परस्परं सम्भाषणं कृतवन्तौ गोविन्दारविन्दौ । ततः छात्राभ्यां श्रुत्यारतीभ्यां परस्परं सम्भाषणं सम्यक् रूपेण प्रस्तुतम् । तस्मात् परं हास्यनाटकं शुभम शर्मा अनुज शर्मा च अकरोत् । एकलगीतं द्वाभ्यां छात्राभ्यां (स्मृतिः, ट्विंकल) गीतम्। द्वादशदिवसात्मकस्य संस्कृतसम्भाषणवर्गस्य छात्रैः छात्राभिश्च अनुभवः श्रावितः । दीपाली, सुनाक्षी हर्ष शर्मा च सम्यक् अनुभवं श्रावितवन्तः। अशोकसती इत्याख्येन छात्रेण संख्यागीतं श्रावितम्। ततः मञ्जूरानी वन्दनाम् अगायत्। अग्रे च वर्गस्य प्रशिक्षकरूपेण समागतेन श्रीमान् तदनन्तरं प्राचार्यमहाभागैः हर्षपूर्वकं निगदितं यत् अद्य तु प्रत्येकं छात्रः/छात्रा संस्कृतेन भाषते । अस्माकं लक्ष्यमासीत् यत् प्रत्येकोपि संस्कृतं वदेत् , तत् फलीभूतं सञ्जातम्। एतदर्थं तैः प्रशिक्षकाय धन्यवादाः प्रकटिताः। सर्वेभ्यः प्रतिभागिभ्यः प्रमाणपत्रं प्रदत्तम्। अस्य द्वादशदिवसात्मकस्य संस्कृतसम्भाषणवर्गस्य संयोजकौ डॉ. अशोककुमारमिश्रः, डॉ. अनिलकुमारद्विवेदी आस्ताम्। कार्यक्रमस्य सञ्चालकेन डॉ. अनिलकुमारद्विवेदीमहोदयेन उक्तं यत् अधुना छात्रेभ्यः छात्राभ्यश्च स्पर्धादिषु सौलभ्यं भवति यतः संस्कृतेन भाषितुं समर्थाः। अन्ते कार्यक्रमस्य धन्यवादज्ञापनं ज्योतिषविभागीयाचार्यैः डॉ. श्यामनाथझावर्यैः अकारि। कार्यक्रमे महाविद्यालयस्य प्राध्यापकगणः उपस्थितः आसीत्, श्रीनितिनकुमारः, डॉ. वीरेन्द्रप्रकाशः, डॉ. गगनदीपसिंहः, श्रीमती उषादेवी, डॉ. मनीषभारद्वाजः, डॉ. रेणूवत्सा, श्रीमती मैथिलीशर्मा, डॉ. विवेकशीलपाठकः, डॉ. बुद्धिबल्लभदेवराणी, श्रीमान् राहुलः, श्रीमान् कमलेशः इत्यादयः समुपस्थिताः आसन् ।

# मातेश्वरी- नवपुष्पाञ्जलि-स्तोत्रम्



- डॉ-शशिकान्त तिवारी 'शशिधर'

शिशुयुववृद्धसुपूजितसिद्धकवीशविगीतनगेशसुते!
हरिहरसेवितनरमुनिवन्दितराक्षसवृन्दविनाशरते!।
भवभयभञ्जिनि नगपतिनन्दिनि भक्तविमोहिनि!मोदरते!
भव भव सम्मुदिता भवदेवि! कुरुष्व दयां मयि मातृवरे!।।01।।
गुरुजनबोधितभक्तसमर्चितविश्वचमत्कृतचक्रधरे!
खलदलनाशिनि दुर्जनमारिणि राक्षसरक्तपिपासिनि हे!।
मतिगतिदायिनि सौख्यविधायिनि दिव्यपिनाकिनि रोषभरे!
भव भव सम्मुदिता भवदेवि! कुरुष्व दयां मयि मातृवरे!।।02।।
तिमिरविभायिनि निर्जरपायिनि बुधमतिवासिनि शुद्धमते!
बहुविधरूपिणि विश्वविमोहिनि!कष्टविदारिणि पूज्यवरे!।
निशिचरदण्डिनि भक्तविमानिनि शान्तसुरूपिणि खड्गधरे!
भव भव सम्मुदिता भवदेवि! कुरुष्व दयां मयि मातृवरे!।।03।।
सकलमनोरथसिद्धिविधायिनि संकटनाशिनि सिद्धरमे!
करधृतदिव्यकृपाणविपाटितदानवमुण्डविनाशरते!।
भवविषमायिनि शैलनिवासिनि सद्वरदायिनि गानभरे!
भव भव सम्मुदिता भवदेवि! कुरुष्व दयां मयि मातृवरे!।।04।।
रघुवरपूजितजानकिवन्दितकृष्णसमर्चितपूज्यतमे!
कलिमलनाशिनि भक्तनिवासिनि धर्मविकासिनि सत्यभरे!।
तव गुणगानरतोस्मि हृदा मम नाशय दुःखमहो! कमले!
भव भव सम्मुदिता भवदेवि! कुरुष्व दयां मयि मातृवरे!।।05।।
नहि जगतीह मनुष्यवरोत्र विना कृपया सुतरिष्यति ते
तव कृपयैव नरो निजलक्ष्यमहो सुखदं समवाप्स्यति हे!।
हर विपदस्स्वकभक्तवरस्य समुद्धर मामिह हे विमले!
भव भव सम्मुदिता भवदेवि! कुरुष्व दयां मयि मातृवरे!।। 06।।
कुरु करुणेश्वरि हे ममतेश्वरि! नैजदयाम्मयि हे शिवदे!
चरणसरोजरतस्य सुभक्तवरस्य समस्तविपत्तिहरे!।
धनबलशून्यगतोस्मि महेश्वरि पाहि हरेश्वरि!कष्टहरे!
भव भव सम्मुदिता भवदेवि कुरुष्व दयां मयि मातृवरे!।।07।।
गगनधरानिलवह्निजलादिकभूतसुरक्षणसत्ययुते!
कविगणसिद्धमहात्मसुरोचितदिव्यगुणप्रभकान्तिवृते!।
शशिधरसेवितविष्णुविमोहितचन्द्रदिवाकरनेत्रयुते!
भव भव सम्मुदिता भवदेवि! कुरुष्व दयां मयि मातृवरे!।।08।।

# देव्या नवपुष्पाञ्जलि-स्तोत्रम्

शिशुयुववृद्धसुपूजितसिद्धकवीशविगीतनगेशसुते!
हरिहरसेवितनरमुनिवन्दितराक्षसवृन्दविनाशरते!।
भवभयभञ्जिनि नगपतिनन्दिनि भक्तविमोहिनि!मोदरते!
भव भव सम्मुदिता भवदेवि! कुरुष्व दयां मयि मातृवरे!।।01।।

गुरुजनबोधितभक्तसमर्चितविश्वचमत्कृतचक्रधरे!
खलदलनाशिनि दुर्जनमारिणि राक्षसरक्तपिपासिनि हे!।
मतिगतिदायिनि सौख्यविधायिनि दिव्यपिनाकिनि रोषभरे!
भव भव सम्मुदिता भवदेवि! कुरुष्व दयां मयि मातृवरे!।।02।।

तिमिरविभायिनि निर्जरपायिनि बुधमतिवासिनि शुद्धमते!
बहुविधरूपिणि विश्वविमोहिनि!कष्टविदारिणि पूज्यवरे!।
निशिचरदण्डिनि भक्तविमानिनि शान्तसुरूपिणि खड्गधरे!
भव भव सम्मुदिता भवदेवि! कुरुष्व दयां मयि मातृवरे!।।03।।

सकलमनोरथसिद्धिविधायिनि संकटनाशिनि सिद्धरमे!
करधृतदिव्यकृपाणविपाटितदानवमुण्डविनाशरते!।
भवविषमायिनि शैलनिवासिनि सद्वरदायिनि गानभरे!
भव भव सम्मुदिता भवदेवि! कुरुष्व दयां मयि मातृवरे!।।04।।

रघुवरपूजितजानकिवन्दितकृष्णसमर्चितपूज्यतमे!
कलिमलनाशिनि भक्तनिवासिनि धर्मविकासिनि सत्यभरे!।
तव गुणगानरतोस्मि हृदा मम नाशय दुःखमहो! कमले!
भव भव सम्मुदिता भवदेवि! कुरुष्व दयां मयि मातृवरे!।।05।।

नहि जगतीह मनुष्यवरोत्र विना कृपया सुतरिष्यति ते
तव कृपयैव नरो निजलक्ष्यमहो सुखदं समवाप्स्यति हे!।
हर विपदस्स्वकभक्तवरस्य समुद्धर मामिह हे विमले!
भव भव सम्मुदिता भवदेवि! कुरुष्व दयां मयि मातृवरे!।। 06।।

कुरु करुणेश्वरि हे ममतेश्वरि! नैजदयाम्मयि हे शिवदे!
चरणसरोजरतस्य सुभक्तवरस्य समस्तविपत्तिहरे!।
धनबलशून्यगतोस्मि महेश्वरि पाहि हरेश्वरि!कष्टहरे!
भव भव सम्मुदिता भवदेवि कुरुष्व दयां मयि मातृवरे!।।07।।

गगनधरानिलवह्निजलादिकभूतसुरक्षणसत्ययुते!
कविगणसिद्धमहात्मसुरोचितदिव्यगुणप्रभकान्तिवृते!।
शशिधरसेवितविष्णुविमोहितचन्द्रदिवाकरनेत्रयुते!
भव भव सम्मुदिता भवदेवि! कुरुष्व दयां मयि मातृवरे!।।08।।

# उत्तर प्रदेश संस्कृत संस्थानम्

संस्कृत भवनम्, रायबिहारी लाल मार्ग, न्यू हैदराबाद, लखनऊ-226007
फोन: 0522-2780251, ईमेल: upsanskritsansthanam@yahoo.com
वेबसाइट: www.upsanskritsansthanam.in

## पुरस्कार विज्ञापन

उत्तर प्रदेश संस्कृत संस्थान द्वारा वर्ष 2022 के अधोलिखित पुरस्कारों हेतु संस्थान की वेबसाइट के माध्यम से **दिनांक 06 अक्टूबर 2023** तक आमंत्रित हैं। ऑनलाइन आवेदन करने के पश्चात् इसकी हार्डकापी (सभी संलग्नों सहित) संस्थान के पते पर भेजें। संस्थान में हार्डकापी प्राप्ति की **अन्तिम तिथि 21 अक्टूबर 2023** है। किसी भी कारणवश विलम्ब से प्राप्त आवेदनपत्र विचारणीय नहीं होंगे। क्रमांक 1,2,3,4,6 एवं 7 के पुरस्कारों का पात्रता क्षेत्र सम्पूर्ण भारत है। शेष सभी पुरस्कारों के लिये आवश्यक है कि विद्वान का जन्म उत्तर प्रदेश में हुआ हो अथवा कम से कम 10 वर्षों से उत्तर प्रदेश में निवास कर रहा हो। प्रदेश में निवास सक्षम स्तर से प्रमाणित हो। **'विश्वभारती', महर्षि वाल्मीकि, महर्षि व्यास, महर्षि नारद तथा 'विशिष्ट-पुरस्कार'** हेतु समिति के अवलोकनार्थ विद्वान की कतिपय प्रतिनिधि कृतियाँ भी उपलब्ध कराना होगा।

**(1) विश्वभारती पुरस्कार-(एक) 5,01,000/- (पाँच लाख एक हजार मात्र)**

**(2) महर्षि वाल्मीकि पुरस्कार-(एक) 2,01,000/- (दो लाख एक हजार मात्र)**

**(3) महर्षि व्यास पुरस्कार-(एक) 2,01,000/- (दो लाख एक हजार मात्र)**

उक्त पुरस्कारों के लिये संस्कृत साहित्य के राष्ट्रीय/अंतर्राष्ट्रीय ख्याति प्राप्त मूर्धन्य विद्वान ही अर्ह होंगे। निर्धारित प्रपत्र पर आवेदन-पत्र स्वयं विद्वान अथवा उनके व्यक्तित्व तथा कृतित्व से परिचित कोई व्यक्ति आवेदन कर सकते हैं। उक्त का क्षेत्र सम्पूर्ण भारतवर्ष होगा। व्यास पुरस्कार की पात्रता हेतु विद्वान की आयु 60 वर्ष होनी चाहिए।

**(4) महर्षि नारद पुरस्कार-(एक) 1,01,000/- (एक लाख एक हजार मात्र)**

संस्कृत पत्रकारिता जगत के ऐसे वरिष्ठ पत्रकार, जिन्होंने कम से कम 25 वर्षों से संस्कृत पत्र-पत्रिकाओं में अपने लेखन/सम्पादन तथा प्रकाशन से संस्कृत पत्र/पत्रिकाओं को राष्ट्रीय स्तर का गौरव प्रदान कराया हो या संस्कृत पत्र/पत्रिकाओं के संस्थापक सम्पादक के साथ ही लेखन (ग्रन्थ) समीक्षा, सम्पादन, अध्यापन कार्य करने वाले विद्वान भी अर्ह होंगे। पुरस्कार की पात्रता हेतु आवेदक की आयु न्यूनतम 60 वर्ष एवं क्षेत्र सम्पूर्ण भारतवर्ष होगा।

**(5) विशिष्ट पुरस्कार- (पाँच) 1,01,000/- (एक लाख एक हजार मात्र) प्रत्येक**

इस पुरस्कार के लिए वही विद्वान अर्ह होंगे, जिनकी संस्कृत जगत में संस्कृत भाषा के प्रचार-प्रसार एवं विकास कार्य हेतु निरन्तर विशिष्ट सेवा की न्यूनतम अवधि 20 वर्ष हो अथवा संस्कृत सम्मेलन/संस्कृत सम्भाषण आदि द्वारा संस्कृत के सामाजिक प्रयोग में उल्लेखनीय तथा प्रभावशाली योगदान किया हो। ऐसे विद्वान स्वयं अथवा उनके कृतित्व एवं व्यक्तित्व से परिचित व्यक्ति निर्धारित प्रपत्र पर आवेदन कर सकते हैं। पुरस्कार का पात्रता उ0प्र0 होगा।

**(6) वेदपंडित पुरस्कार- (10) 51,000/- (इक्यावन हजार मात्र) प्रत्येक**

इस पुरस्कार हेतु वेदपंडित को वेद की किसी भी शाखा की सम्पूर्ण संहिता सस्वर कण्ठस्थ होनी चाहिये। इस पुरस्कार के लिये वेदपंडित को संस्थान द्वारा आयोजित वेद परीक्षा में भाग लेना होगा। वेदपण्डित पुरस्कार का क्षेत्र सम्पूर्ण भारत होगा। उत्तर प्रदेश में जन्म लेने वाले अथवा विगत 10 वर्षों में निवास करने वाले वेद पण्डितों को 10 अंक का अधिमान दिया जायेगा।

**(7) नामित पुरस्कार- (पाँच) 51,000/- (इक्यावन हजार मात्र) प्रत्येक**

विगत दो कलेण्डर वर्षों में प्रकाशित (वर्ष 2020 एवं 2021) काव्य ग्रन्थ, गद्य, पद्य, विषय की मौलिक तथा उत्कृष्ट संस्कृत रचनाओं को और/या दर्शन, पुराण-इतिहास, धर्मशास्त्र, वेद-वेदांग, तथा व्याकरण की उत्कृष्ट रचनाओं को अधोलिखित नामित पुरस्कारों हेतु निर्धारित प्रपत्र पर ग्रन्थ की 5 प्रतियों के साथ आमंत्रित की जाती है।

**(क) कालिदास पुरस्कार (ख) बाणभट्ट पुरस्कार (ग) शंकर पुरस्कार (घ) व्यास पुरस्कार (ङ) पाणिनि/सायण पुरस्कार**

उपर्युक्त पाँचों पुरस्कारों हेतु निर्धारित प्रपत्र पर ग्रन्थ की 5 प्रतियों के साथ आवेदन आमंत्रित है।

नामित पुरस्कार हेतु पुस्तक का प्रथम संस्करण ही पुरस्कार के लिए विचारणीय होगा। पूर्व प्रकाशित रचनाओं के संशोधित संस्करण पुस्तक के रूप में प्रकाशित होने की दशा में पुरस्कार के लिए विचारणीय हो सकता है जब उसकी 60 प्रतिशत सामग्री पूर्व में प्रकाशित न हुई हो। ऐसी कृति जिसे पहले उ0 प्र0 संस्कृत संस्थान पुरस्कृत कर चुका है, पुरस्कार योग्य नहीं मानी जायेगी।

**(8) विशेष पुरस्कार- (छः) रू0 21,000/- (रू0 इक्कीस हजार मात्र) प्रत्येक**

प्रत्येक वर्ष के पुरस्कार हेतु उस पुरस्कार वर्ष के ठीक पहले वर्ष में प्रकाशित (वर्ष 2021 में) विशिष्ट रचनात्मक एवं समीक्षात्मक कृतियां ही इस पुरस्कार के लिए विचारणीय होगी। इस वर्ग का एक पुरस्कार पालि/प्राकृत में रचित ग्रन्थों के लिए आरक्षित है। यदि पालि/प्राकृत में रचित उपर्युक्त ग्रन्थ उपलब्ध नही होगे तो इस पुरस्कार को संस्कृत भाषा के लिए विचार किया जायेगा।

**(9) विविध पुरस्कार- (बीस) रू0 11,000/- (रू0 ग्यारह हजार मात्र) प्रत्येक**

**(क) साहित्य पुरस्कार- (दस) (ख) शास्त्र पुरस्कार (छः)**
**(ग) बाल साहित्य पुरस्कार (दो) (घ) श्रमण पुरस्कार (दो)**

इस पुरस्कार हेतु उस पुरस्कार वर्ष के ठीक पहले वर्ष में प्रकशित (वर्ष 2021) संस्कृत की रचनात्मक मौलिक कृतियाँ तथा संस्कृत विषयक हिन्दी में रचित समीक्षात्मक कृतियां अथवा संस्कृत भाषा से अन्य भाषाओं में अनूदित रचनायें पुरस्कार के लिए अर्ह होगी। संस्कृत प्रश्नोत्तरी (गाइड) शोध प्रबन्ध सदृश पुस्तकों पर विचार नही किया जायेगा।

**नोटः 1.** विस्तृत सूचना तथा आवेदन पत्र प्रारूप उ0प्र0 संस्कृत संस्थान, लखनऊ के वेबसाइट पर उपलब्ध है जिसे डाउनलोड किया जा सकता है अथवा किसी भी कार्य दिवस में संस्थान कार्यालय से प्राप्त किया जा सकता है।

**2.** प्रत्येक पुरस्कार हेतु अलग-अलग आवेदन करना अनिवार्य है। अलग-अलग पुरस्कारों हेतु एक ही आवेदन मान्य नहीं होगा।

**निदेशक**


# पाणिनिसंस्कृतविश्वविद्यालये नूतनभवनयोः लोकार्पणं जातम्

-डॉ. दिनेशः चौबे)

उज्जयिनीस्थस्य महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालयस्य नवनिर्मितयोः योगेश्वरश्रीकृष्णयोगभवनमहर्षि सान्दीपनिभवनयोः लोकार्पणं



जातम् द्वाविंशे तमे दिनाङ्के शुक्रवासरे सायंकाले विश्वविद्यालयस्य देवासमार्गस्थे परिसरे प्रदेशस्य उच्चशिक्षामन्त्री डॉ. मोहनयादवमहोदयस्य करकमलाभ्यां लोकार्पणविधि सुसम्पद्यत लोकार्पणसमारोहस्य शुभारम्भः वाग्देव्याः सरस्वत्याः समर्चनेन, दीपदीपनेन च जातः। तदनु वैदिकमङ्गलाचरणं, सरस्वतीवन्दना विश्वविद्यालयस्य कुलगानञ्च अवभत् ।

अथितिनां स्वागतं विश्वविद्यालयस्य कुलपतिवर्येण, कुलसचिवमहोदयेन च् कृतवन्तौ । कार्यक्रमे मुख्यातिथिरूपेण विराजमानेन उच्चशिक्षामंत्रीमहोदयेन उक्तं यत् पाणिनिसंस्कृतविश्वविद्यालयस्य सर्वविधविकासाय शासनं कृतसङ्कल्पितो वर्त्तते। प्रदेशे विभिन्ननगरेषु अस्य परिसराः संस्थापनीयाः यतोहि संस्कृते महत्त्वपूर्णज्ञानराशिः उपनिबद्धो वर्त्तते। अस्याः महिम्नः सर्वेपि परिचिताः सन्ति। संस्कृतं ज्ञानविज्ञानस्य भाषा अस्ति। कार्यक्रमस्य अध्यक्षः विश्वविद्यालयस्य माननीयः कुलपतिः आचार्यः विजयकुमारमेननमहोदयः आसीत् ।महोदयेन उक्तं यत् संस्कृतस्य विश्वविद्यालयस्य च् विकासाय मंत्रीमहोदयस्य आभारं विज्ञापयामि संस्कृतग्रन्थेषु नानाविधाविष्काराः तत्त्वरूपेण निहिताः वर्त्तन्ते। अतः संस्कृतम् अवश्यं पठनीयम्। आधुनिककाले अपि संस्कृतभाषाप्रयोगस्य अनिवार्यता अनुभूयते। विशिष्टातिथिरूपेण श्रीमतिकलावतीयादवमहोदया, सभापतिः ,उज्जैननगरनिगमः श्रीश्यामबंसलः, उज्जैनविकास प्राधिकरणाध्यक्षः, कार्यपरिषद् सदस्याः श्रीमान्सुशील वाडिया,श्रीमानराजेन्द्रझालानी, डॉ.उपेन्द्रभार्गवः, डॉ. संकल्पमिश्रः च् समुपस्थिताः आसन्।सञ्चालनं डॉ. तुलसीदासपारौहामहोदयेन, आभारप्रदर्शनं कुलसचिवेन डॉ. दिलीपसोनीमहोदयेन कृतम् कार्यक्रमैस्मिन् विश्वविद्यालयस्य सर्वे विभागाध्यक्षाः आचार्याः छात्राः शोधच्छात्राः, नगरस्य गणमान्यजनाः पत्रकाराश्च उपस्थिताः आसन्। अन्तिमे कल्याणमन्त्रेण सह सभा समाप्ता।

# वेदविमर्शस्य नूतनाः पक्षाः विचारणीयाः

-डा.धनञ्जय कुमार आचार्य

दिल्ली-नगरस्य वेदसंस्थानस्य wider Association for Vedic studies (WAVES) इत्यस्य युवशाखायाः तरुणतरङ्गेत्याख्यायाः



संयुक्ततत्वाधाने २०२३ तमवर्षस्य सितम्बर-मासस्य २४ दिनाङ्के एकदिवसीया वेद-गोष्ठी आयोजिता, यस्मिन् १५ प्रख्यातविद्वांसः अनेके शोधच्छात्राः च भागं गृहीतवन्तः स्वशोधपत्रं च प्रस्तुतवन्तः । प्रतिभागिषु वेदसंस्थानस्य अध्यक्षः प्रद्युम्नशर्ममहोदयः, वेदसंस्थानस्य निर्देशकः डॉ. देवकृष्णदासः, वेव्स इत्यस्याध्यक्षा आचार्या शशिः तिवारी, उत्तराखण्डसंस्कृतविश्वविद्यालयस्य कुलपतिः आचार्यः दिनेशचन्द्रश्शास्त्री वेव्स इत्यस्य महासचिवः आचार्यः रणजित् बेहेरा, वेव्स इत्यस्य सचिवः डॉ. अपर्णा धीरखंडेलवाल, वेव्स इत्यस्य जनसंपर्काधिकारी डॉ. धनंजय कुमारआचार्यः, वेव्स-तरुणतरङ्गस्य अध्यक्षा डॉ. करुणा आर्या, डॉ. वेदव्रत आलोक, डॉ. आशालता पाण्डेय, डॉ. ललिता जुनेजा, डॉ. प्रेम देवली, डॉ. उमा आर्या, प्रोफेसर एम. एम. बजाज, डॉ. विजेन्द्रः, आचार्यः देवेन्द्रप्रसादमिश्रः, डॉ मीना कुमारी, डॉ नीलम गौड, डॉ सुमन चेत्येतानि नामान्युल्लेखनीयानि सन्ति, येषां विचारमाध्यमेन वेदविमर्शस्य नूतनाः पक्षाः समुद्घाटिताः। वेदसंस्थानस्य पत्रिकायां वेदसवितायां चितानि कानिचन शोधपत्राणि प्रकाशयिष्यन्ते, यस्मात् अन्ये विद्वांसः अपि लाभं ग्रहीतुं समर्थाः भविष्यन्ति। कोरोनाकालानन्तरं वेव्स इत्यस्य एषा प्रथमा प्रत्यक्षसभा आसीत्, यस्मिन् तरुणतरङ्गः उत्साहेन भागं गृहीतवान्, वेदसंस्थानेन च तस्मै पूर्णसहयोगः प्रदत्तः। प्रेक्षकाणां दृष्ट्यायं कार्यक्रमोऽतीव सफलोऽभवत् ।




अस्माकं प्रेरणास्रोतः- स्व.पं०रामकिशोरशर्मा, स्व.पद्मश्री डॉ.रमाकान्तशुक्लः
परामर्शकाः-डॉ.बलदेवानन्दसागरः, डॉ.अरविन्दकुमारतिवारी, डॉ.राधेश्यामअवस्थी
सम्पादिका-मञ्जूशर्मा, सम्पादकमण्डलम् - डॉ.सुन्दरनारायणझा, डॉ.सुरेन्द्रमहतो, डॉ.विमलेन्दु कुमार त्रिपाठी, डॉ.संदीपकुमार उपाध्याय, धीरजमैठाणी, प्रबन्धसम्पादकौ-वेदप्रकाशशर्मा, नेहाशर्मा च,

स्वत्वाधिकारिण्या, मुद्रिकया, प्रकाशिकया सम्पादिकया च मञ्जूशर्ममहोदयया लक्ष्यप्रिंटर्स,521/8 बी, भूतलं , वितिका सं. - 14, आदर्शमोहल्ला, मौजपुरनगरम् , देहली-53तः मुद्रापयित्वा ए-2/32, वजीराबादमार्गः भजनपुरा, देहली-53 इत्यतः प्रकाशितम्।
दूरभाष : 09311086751 ई-मेलः sanskritsamvad@gmail.com, RNI No. : DELSAN/2011/38660 DL(E)-20/5534/2021-23 केन्द्रीयसंस्कृतविश्वविद्यालयः नवदेहली अनुदानेन प्रकाश्यमानं पत्रमिदम्।